शतं वा भोजयेद्विप्रान् गायत्र्या वालक्षकम्।।४१।।
प्रायश्चित्ते कृते विप्रो मुच्यते दुः प्रतिग्रहात्।
प्रायश्चितं न चेत् कुर्याद् ब्राह्मणो ज्ञान मोहितः।।४२।।
तद्युवानः प्रमी यन्ते नप्तारः पुत्रपौत्रकाः।
मृतश्च प्रेत तां गच्छेन् न ग्राह्योदुः प्रतिग्रहः।।४३।।
अश्वदानं महादानं यत्ना तच्च विवर्जयेत्।
यावंति तस्य रोमाणि तावत् स्वर्गं गमोश्वदः।।४४।।
तमेव प्रतिगृह्नानो नरकं प्रतिपद्यते।
प्रतिग्रहे न दोषः स्याद्दोषस्तस्यैव विक्रये।।४५।।
ऋषिभिश्च पुरागाथा गीताश्चाश्वस्य विक्रये।
असंभाष्योह्य पांक्तेयः पापिष्ठः सदुरात्मकः।।४६।।
यानि कानि तु पापानि ब्रह्म हत्या समानि च।
प्रायश्चित्तैर्विशुद्ध्यंति न तैश्च हय विक्रयी।।४७।।
रोम्णि रोम्णि ब्रह्महत्या पापं तस्य विधीयते।
अश्वानां प्रतीग्रहीतानां विक्रयेन पुमान् भवेत्।।४८।।
साग्रं कल्पशतं यावत् पच्यते ताम्रभ्राष्ट्रके।
तस्माद्विनिर्गतः काले पाषाणेखुर्भवेन्नरः।।४६।।
तस्मान्न प्रतिगृह्नीयात् द्विजस्तत्पाप भाग्भवेत्।
अश्वानां विक्रयं कृत्वा चरेच्चाद्रायण त्रयम्।।५०।।
लक्ष त्रयं वा गायत्र्या जपेद्वासु समाहितः।
प्रतिग्रहे चरेद्विप्रा अतिकृच्छ्रं न संशयः।।५१।।
द्विगुणं वाजपेद् वेदं ब्राह्मणान् भोजयेच्छतम्।
आपत्सु प्रतिगृह्नाति न एतेनैव विशुद्ध्यति।।५२।।
यज्ञार्थेन च सृष्टानां ब्रह्मणा पद्मयोनिनाः।
तेषां प्रतिग्रहो घोरो न कुर्याद् दुस्तरो यतः।।५३।।
प्रतिग्रहेण सहसाय देना भवति द्विजे।
अपि सर्वमधी याने तं श्रृणुष्व मयाकृतम्।।५४।।

नाभि भाषेततं दत्वा न मुखं चावलोकयत्।
दुष्टप्रतिग्रहतो विप्रो भवति किल्विषी।। ५५।।
मुखावलोकने यस्य प्रायश्चिती भवेज्जनः।
जानन् कथंचिद्विप्रोपि निंदंतं तु समाचरेत्।।५६।।
इहैव सक्षणार्द्धेन दिवाकीर्ति समो भवेत्।
परलोकेपि तस्यैव नान्यां विंद्याद् गतिं तथा ।।५७।।
ऐहिकामुष्णिकार्थीयस्तस्मात्तान्परिवर्जयेत्।
प्रमादात्तान्गृहीत्वा तु प्रायश्चितं समाचरेत्।।५८।।
सवासाजलमाप्लुह्य षष्ठं अशं परित्यजेत्।
चान्द्रायणं ततः कुर्याज्जयोतिष्टोमं यजेत् ततः।।५९।।
विष्णोर्जिष्णो हृषीकेश प्रतिमां स्थापयेतु वा।
ऋणार्थं प्रतिगृह्नानो मुच्यते दुः प्रतिग्रहत्।।६०।।
कन्या प्रतिग्रहं कृत्वा ब्राह्मणस्तु यथा विधिः।
कर्मणोंते ततः कुर्याद् भूरिदानं द्वि जातिषु।।६१।।
कन्या प्रतिग्रहस्तेन व्रजत्येव ददद्वसुः।
भूरिदानं न चे त्कुर्यात् कन्यादाने द्विजो यदा।। ६२।।
तदा कन्या स्वरूपेण सा कन्या तं जिघांसतिः।
गृहवासः सुखार्थाय पत्नी मूल च तत्सुखम्।।६३।।
सा पत्नी या विनीता च चित्तज्ञावशवर्त्तिनी।
तद्रूपा भूरिदानास्तु अन्यथा विकला भवेत्।।६४।।
कपिलां प्रतिगृह्नीयात् होमार्थं श्रेयसे द्विजः।
कपिला दर्शने पुण्यं तस्यैव स्पर्शने स्मृतम्।।६५।।
पुण्यं दान उभाभ्यां च पुण्यं तस्यैव पोषणे।
प्रतिग्रहस्ततस्मात् पुण्यात्पुयण्तरः स्मृतः।।६६।।
परं नं विक्रयं कुर्यान् महादोषो भवेतत्तः ।
कपिला विक्रयं कृत्वा चरेत्चांद्रायण त्रयम्।।६७।।
शूद्राद्यदि च गां गृह्णन् चरेत्तत्रैंद वद्वयन्।
तस्मात्तां परिगृह्नीयात् परं विक्रयणं न हि।।६८।।
कृष्णा जिनं मृतः शय्यां कालं पुरुषमेव च।
प्रतिग्राही कुरूक्षेत्रे न भूयः पुरुषो भवेत्।।६९।।
तथापि मनसः शुद्धौ प्रायश्चितं समाचरेत्।

तप्त कृच्छ्रद्वयं कुर्यादैंदवे न समन्वितम्।।७०।।
सत्रेण यजते वाथ यजेदवा लक्ष सप्तकम्।
वापीकूपतड़ागादि कीर्त्तनैर्विसृजेद्वनम्।।७१।।
तदनित्यं भवेत् स्मान्नस्थिरं तु भवेद्वसु।
प्रतिग्रहार्जितं द्रव्यं सर्वं नश्यति मूलवत्।।७२।।
राज प्रतिग्रहो घोरोमध्वा स्वादो विषोपमः।
तं ज्ञात्वा मानवः कस्मात् करिष्येहं प्रलोभदम्।।७३।।
भक्षिते मानुषे मांसे प्रायश्चितं विधयिते।
तत्कारिष्यामहे सर्वे न तु राजप्रतिग्रहम्।।७४।।
प्रतिग्रहरतानां तु ब्राह्मणानां खगोत्तम।
मानुष्यमपि दुःप्राप्यं ब्रह्मलोकः कुतो भवेत्।।७५।।
ग्रहणादि शुभाः कालादानहोमादि कुर्वताम्।
गृह्णन्ति शुभ कर्त्तृणां ब्राह्मणस्य गृहे तथा।।७६।।
तामिश्रमंधता मिश्रं पूयं विष्ठा च शोणितम्।
असि पत्र वनं घोरं सदृशं श्लेष्म भोजनम्।।७७।।
शाल्मलं काक तुण्डं च सर्पो वैतरणी तथा।
क्रकचं गुद पोथं चममरं तप्तबालुकम्।।७८।।
धेनु यद्विभूषिये च धान्या दि दशपर्वताः।
एषामन्यतमंगेह न भूयः पुरुषो भवेत्।।७९।।
एषा प्रतिग्रहे विप्रः क्षियेन्मास चतुष्टयम्।
प्राजापत्येन कृच्छ्रेण तत् षष्ठ्यांशं परित्यजेत्।।८०।।
जपेद्वादशलक्षांश्च गायत्र्या हव्य भोजनः।
एतेन मुच्यते पायादन्यथा नरकं व्रजेत्।।८१।।
भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति।
ता वुभौ पुण्य कर्माणो नियतं स्वर्गगामिनौ।।८२।।
प्रतिग्रहे न दोषः स्यात् दोषस्तस्यास्तु विक्रये।
तथापि खलु यज्ञेन मुच्यते तत्प्रतिग्रहात्।।८३।।
अन्यैरपहृतीं भूमिं यः सशक्तिरूपेक्षते।
नरके पच्यते घोरे युगानामेक सप्ततिः।।८४।।
तस्मात् भूमिं च पत्नीं च मातृ पूर्वं गते तथा।
पैररपहृतां दृष्टवा सद्यः प्राणान् परित्यजेत्।।८५।।

विक्रीणानश्चतां नूनं नरकं प्रतिपद्यते।
नरो भूविक्रयं कृत्वाच्चरेच्चान्द्रायाण त्रयम्।।८६।।
द्विगुणं प्रजपेद वेदं नवग्रह मखं यजेत्।
एतेन मुच्यते पापादन्यथा नरकं व्रजेत।।८७।।
तुला पुरुष मुख्यानि महादा दानि षोडश।
तेषामन्यतमं गृह्य प्रायश्चित्तीयते द्विजः।।८८।।
अन्यथा नरकं याति प्रेतत्वमनुगच्छति।
यतः स्वस्ति च या गावो रत्न हेम विनिर्मिताः।।८९।।
गो सहस्र समुद्भूता वैतरण्यश्चयाः स्मृता।
एतास्तु द्विजवर्येण वर्जनीयाः प्रयत्नतः।।९०।।
यज्ञ कर्माणि या धेनुर्या धेनु र्व्रतकर्मणि।
प्रायश्चित्त निमित्तं वा होमार्थं याच दुर्बला।।९१।।
मधुपर्के च या धेनुः या धेनुः कर्मसिद्धये।
एताः सर्वा द्विजो विद्वान् प्रतिग्रह्णन्न कामतः।।९२।।
लिप्यते नैव पापेन पद्म पत्रमिवांभसा।
गो सहस्रादि तश्चैकां प्रतिगृह्णन्नकामतः।।९३।।
गोमूत्र पावका हारो मासेनैक न शुद्ध्यति।
ऋक्तामवेदो नियतो जपेद् वा शिव सन्निधौ।।९४।।
एवं तत् पापतो मुच्येदन्यथा नरकं व्रजेत्।
वैतरणीं प्रतिगृह्य ते च दण्ड महाभयम्।।९५।।
वैतरिणीं निमज्जेत यावदाहूत संप्लवः।
रक्तोदपूय मांसाधौ वसेत कल्पत्रयं नरः।।९६।।
अनुगृह्यन् स्वस्य तस्माच्छास्त्रोक्त विधिमाचरेत् ।
प्राजापत्यत्रयं कुर्यादथवा शश भोजनम्।।९७।।
जपेद्वासस्य वामीय शिव संकल्पमेव च।
रथन्तरं वामदेव्यं मुच्यते तेन किल्विषात्।।९८।।
हिरण्य कामधेन्वादे गृंहणतस्तु यथोचितः।
महाभूमिधरादिभ्यः प्रायश्चितमथोच्यते।।९९।।
येभ्यश्च प्रतिगृह्णीयात् धर्माभवोद्विजाभ्रमः।
मज्जेत् स नरके घोरे विष्ठामूत्र समाकुले।।१००।।
धर्माभावो द्विजस्तस्मात् प्रतिगृह्य चरे द् व्रतम्।

तप्तकृच्छ्र त्रयं चैकं अतिकृच्छ्रं तथैव च।।१०१।।
अथवा मुच्यते पापात् प्राणायाम परायणः।
प्राणायामोदहेत्सर्वं यच्छरीरेस्ति किल्विषम्।।१०२।।
यथा वनगतो वह्नि शुष्कमार्द्रमर्पं धनम्।
प्राणायामस्तथा पापं दहते नात्र संशयः।।१०३।।
पावका इव दीप्यन्ते जपहोमैर्द्विजोत्तमाः।
प्रतिग्रहेण शाम्यंते पावका इव वारणा।।१०४।।
प्रतिग्रह भवान् दोषान् प्राणायामैर्द्विजोत्तमाः।
नाशयंतीह विद्वासो वायुर्मेघानिवां वरे।। १०५।।
त्वग सृक् पिशितास्थीनि मेदोमज्जावसास्तथा।
एकैकं सप्त रात्रेण पुनात्यह रहः कृताः।।१०६।।
प्राणायामैर्दहेत्पापं धारणाभिस्तु किल्विषम्।
प्रत्याहारैर्जयेल्लोकान् योगेन परमं पदम्।।१०७।।
नास्ति तत्पातकां लोके यच्छुद्ध्यैन्ना सुसंयमैः।
प्रतिगृह्य ततो विप्रं प्राणायामान् शतं चरेत्।।१०८।।
प्राणायामेन शुद्धयंति गायत्र्या जपनेन च।
नारायणानु स्मरणान् मुच्यते सत्प्रतिग्रहात्।।१०६।।
दशलक्षेस्तु गायत्र्याः सहस्रं प्राण संचरन्।
हयाश्व रथस्तद्वृद्धमहस्ति रथस्तथाः।।११०।।
पंचलांगलकं तद्वद्वरादानं तथैव च।
द्वादशं विष्णु चक्रं तु ततः कल्पलतात्मकम्।।१११।।
सप्तसागरदानं च रत्नधेनुस्तथैव चः।
महाभूत व्ययं चैव षोडशं परिकीर्त्तितम् ।।११२।।
एतेष्वन्यतमं दानमेकस्मैन प्रदीयते।
यतो दोषाय भवति दत्तं दानं द्विजातये।।११३।।
षोडशैस्तु महाशब्दः संप्राप्यस्तस्य गौरवात्।
तस्मात् प्रतिग्रहस्यैषां मनसापि न चिन्तनम्।।११४।।
तुला पुरुष संज्ञं तु आद्यं यत्कथितंत्विहः।
तस्यां तुलायामारूढो यजमानः स्वयं तुलेत्।।११५।।
तत्र मांस समं तस्य सुवर्णां तद्विधीयते।
नष्टे मूल फलस्यैव सद्भवेन्मांसलक्षमण्।।११६।।

तत्पापं च भवेतस्य सर्वतो नरकं ध्रुवम्।
नरकान्नि सृतः पश्चात्प्रेतः कल्पशतत्रयम्।।११७।।
तस्मान्न प्रति गृह्णीयात् स्तोकं स्तोकार्द्धमेव वा।
गृहीत्वा तस्य भागं तु चरेच्चांद्रायणं द्विजः।।११८।।
हिरण्यं गर्भ ब्रह्माण्डं कल्पयादयमेव च।
एतेषु भागं गृहणानो ब्राह्मणो नरकाय सः।।११६।।
प्रभादाद्वाथ लोभेन गृहीत्वा व्रतमाचरेत्।
जले त्रिषवणस्तापी चरेत्सां तपनद्वयम्।१२०।।
गो सहस्रं महादानं दानतुल्यं न तत्परम्।
गोभिश्चध्रियते लोको गावः सर्वस्य मातरः।।१२१।।
गो सहस्र समूदभूतो दुस्तरस्तु द्विजन्मनाम्।
गो शते गो सहस्रे च वैतरण्यश्चयाः स्मृताः ।।१२२।।
धेनुर्वान्याश्चयागावोरत्नहे विनिर्मिताः।
एतास्तु द्विज धर्मेण वर्जनीया प्रयत्नतः।।१२३।।
यज्ञ कर्माणि या धेनु र्या धेनुर्द्धर्भ कर्माणिः।
प्रायश्चित निमित्तेया होमार्थं दुर्वलाथवा।।१२४।।
मधुपर्के च या धेनु या धेनुः कर्म सिद्धये।
एताः सर्वा द्विजो विद्वान् प्रतिग्रह्य यतस्ततः।।१२५।।
नैव पापेन लिप्येत पद्म पत्रमिवांभसा।
गो सहस्राधिकं चैव प्रतिग्रह्य अकामतः।।१२६।।
गो मूत्र पावकाहारो मासेनैकेन शुद्धयति।
ऋक्तामवेदौ नियतौ जपेद् वा शिव सन्निधौः।।१२७।।
नारायानुस्मरणान्मुच्यते दुः प्रतिग्रहात्।।१२८।।
गायत्र्या दश लक्षेण प्राणायाम सहस्रशः।
तेन पापेन मुच्येत अन्यथा नरकं व्रजेत।।१२६।।
प्रतिगृह्य च वैतरणीं लोहदण्ड समन्विताः।
वैतरण्या न मुच्येत यावदाहूत संप्लवम्।।१३०।।
रक्तोदक तत्र व हेत् संदोष्णं पूयैश्च मां सैश्चकर्दमाकुलम्।
कल्पत्रयं पच्यति तत्र मध्ये अनुग्रहं चैव य दान कुर्यात्।।१३१।।
तस्मादनुग्रहं कुर्याच्छास्त्रोक्त विधिना नरः।।१३२।।
प्राजापत्य त्रयं कुर्यादथवा शत भोजनम्।

जपेद्वा अस्य वामीयं शिवसंकल्पमेव च।।१३३।।
रथंतरं वामदेव्यं मुच्यते तेन किल्विषात्।
हिरण्य कामधेन्वादि अन्येषां तु यथोदितम्।।१३४।।
महाभूत घटं तेभ्यः प्रायश्चित रथोच्यते।
एतेभ्यः प्रतिग्रह्णीयाद्धर्माभाषो द्विजो यदा।।१३५।।
तदा मज्जेत नरके पूय विष्ठा समाकुले।
धर्माभासो द्विजस्तस्मात्प्रतिगृह्य चरेदव्रतम्।।१३६।।
तप्तकृच्छ्रद्वयं चैव अतिकृच्छ्रं तथैव च।
अथवा मुच्यते पापात्प्राणायामपरायणः।।१३७।।
प्राणायामैर्दहेत्सर्वं शरीरं यच्च पातकम्।
यथा वनगतो वह्नि शुष्कार्द्रं दहतीं धनम्।।१३८।।
प्राणायामैस्तथा पापं शुष्कार्द्रं नात्र संशयः।
पावका इव दीप्यन्ते जप होम क्रियारताः।।१३९।।
प्रतिग्रहेण शाम्यंति उदकेनाग्नयो यथा। १४०।।
प्रतिग्रहेण शाम्यंते पावकः सलिलादिना।
तान्प्रतिग्रहजान् दोषान् प्राणायामैद्विजोतमाः।।१४१।।
नाशयंतीह विद्वांसो वायुर्मेधानिवांवरे।
नारायणानुस्मरणान् मुच्यते दुःप्रतिग्रहात्।।१४२।।
गायत्र्या दश लक्षेण प्राणायामैः सहस्रशः।
नश्यंति पाप संघानिकः कुर्यान्न प्रतिग्रहे।।१४३।।
प्रतिगृहाधिकं नास्ति ब्राह्मणस्य विनाशनम्।
भ्रस्यते ब्रह्मवर्चात्सन्नरके च प्रजायते।।१४४।।
नरकान्निः सृतः काले जायते ब्रह्मराक्षसाः।
तस्माज्जलमयो हस्ती मानुषी जलमाश्रितः।।१४५।।
तस्माद्विनिर्गतः प्श्चादुलूकंश्चापदो भवेत्।
प्राप्यते मानुषी योनिर्दरिद्रो दुःखितस्तथा।।१४६।।
व्याधितश्चैव मूर्खश्च बंधुभिश्च विवर्जितः।
दृष्ट्वा परिश्रियं दीप्तामनु तापं मुहुर्मुहुः।।१४७।।
दुष्ट प्रतिग्रह हतो विप्रो भवति किल्विषी।
तस्मात् प्रतिग्रहं कृत्वा प्रायश्चित्तं समाचरेत्।।१४८।।
यस्मात् प्रतिग्रहं धनं न स्थिरं स्यात्कदाचन।

प्राज्ञः प्रतिग्रहं कृत्वा तद्धनं सद्गतिं नयेत्।।१४९।।
यजेद् वा सप्तसंस्थेषु पुण्यान्पायतनानि वा।
शिवस्य विष्णोर्मार्तण्ड स्यागारेविसृजेदथ।।१५०।।
वापीकूपतडागेषु ब्रह्मवित् स्वधमुक्तये।
एतेषु विसृजेच्छुक्लमन्यथा नरकं व्रजेत्।। १५१।।
प्रायश्चितं तु यत्प्रोक्तं ब्राह्मणस्य प्रतिग्रहे।
शूद्रादि वर्णिनां चैतद्विगुणं तु समाचरेत्।।१५२।।
शय्या च पादुके विद्यां छत्रंचामरवाससी।
आसनेषु च सर्वेषु प्रायश्चितं भोजनम्।।१५३।।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम्।
कृते पापेनुतापो वै यस्य पुंसः प्रजायते।।१५४।।
प्रायश्चितं तु तस्यैव हरि संस्मरणं परम्।
प्रातर्निशि तथा संध्या मध्याह्नादिषु संस्तुवन्।।१५५।।
नारायणमवाप्नोति सद्यः पापक्षयं नरः।
विष्णोः संस्मरणदेव समस्त क्लेश संचयम्।।१५६।।
मुक्त्वा प्रयाति सस्वर्गं तस्य विष्णोनुमीलने।
वासुदेवे मनो यस्य जपहोमार्चनादिषुः।।१५७।।
तस्यांतेरायोवैसूतदेवेंद्रादधिकं फलम्।।१६०।।
।।इति महर्षि अरुण विरचित प्रतिग्रह प्रायश्चित्तानि समाप्तानि।।

सूर्य : दर्शन तत्त्व खण्ड

सूर्य गीता

श्री सूर्यगीता : आधिवैदिक विज्ञान
सप्तर्षियों को आदिदेव सूर्य द्वारा दिव्य ज्ञान

श्री सूर्यदेव से सप्तर्षियों ने अधिदैव रहस्य कर्म–ज्ञान–उपासना के समन्वित स्वरूप, मोक्ष, ब्रह्माण्डों की सृष्टि लय एवं विलय रहस्य, भूलोक की रचना और जम्बूद्वीप आर्यावर्त वर्णन, आत्मस्वरूप, अधिभूतरूपस्वरूप योगविज्ञान आदि विषयों पर जिज्ञासा व्यक्त की। श्रीसूर्यदेव ने श्रीसूर्यगीता में बहुत ही सहज और सरल तरीके से ज्ञान दिया।

वैदिक परम्परा में श्रीसूर्यगीता को उपनिषद् की संज्ञा दी गई है। आदिदेव सविता–सूर्य तीनों तरह के तापों का उन्मूलन करनेवाले हैं। सौर सम्प्रदाय के अनुसार श्रीसविता देवता ही निखिल ब्रह्माण्ड का सृजन करते हैं (वेद में सविता एवं सूर्य के सूक्त और वैदिक नासदीय सूक्त, पुरुष सूक्त, हिरण्य गर्भ सूक्त, अस्यवामस्य सूक्त, प्रजापति सूक्त आदि इसकी पुष्टि करते हैं।)। ऋग्वेद, सामवेद, यजुर्वेद और अथर्ववेद के सविता एवं सूर्य के मन्त्रों की शैली काव्यात्मक, अभिव्यंजनात्मक, संकेतात्मक, प्रतीकात्मक, कूटात्मक, ध्वन्यात्मक, अध्यात्मिक रहस्यवादी, गूढ़तम रहस्यात्मक पहेलियाँ आदि हैं। श्रीसविता देव द्वारा ब्रह्माण्ड के जटिल रहस्य को परत दर परत रहस्योद्घाटित किया गया।

सृष्टि प्रकरण एवं आत्मस्वरूप में सप्तर्षियों ने सृष्टि रचना और आत्मस्वरूप के बारे में श्रीसूर्यदेव से ज्ञान देने का प्रार्थना की। श्रीसूर्यदेव ने कल्पवृक्ष की तरह विराट् ब्रह्माण्ड और अण्ड–पिण्ड से अध्यात्मिक, आधिदैविक एवं आधिभौतिक सृष्टि से सम्बन्ध की ब्रह्मविद्या की विवेचना की। यहाँ स्मरण रहे कि वेदविद्या परमव्योम में अनेक ब्रह्माण्ड एवं अनेक सूर्यों की उपस्थिति का चौंकानेवाला वर्णन करती है। वेद अर्थात सृष्टिविज्ञान में सौर्य मण्डल के ग्रहों का वर्णन भी आश्चर्यचकित करता है। पश्चिमी वैज्ञानिक प्रारम्भ में अतिरंजित रूप से वेद को आदमकाल का प्रलाप कहकर हँसी उड़ाते रहे। शताब्दियों की शोध अनुसंधान के बाद वैज्ञानिकों–खगोलविदों ने वेद के वर्णन को सटीक पाया। ग्रहों का रूपाकार वैदिक विज्ञान के अनुसार ही है। आज तक विश्वभर के वैज्ञानिक सूर्यदेव, मंगलदेव, चन्द्रदेव, शनिदेव आदि के रहस्यों को ही नहीं जान पाये हैं। वैदिक मन्त्रद्रष्टा ऋषियों ने आदिदेव सविता

और सूर्य के गूढ़तम गुह्यज्ञान का मन्त्रों में प्रकटीकरण किया। ऋषियों ने हमारे सौरमण्डल के सूर्यदेव में दहनशील धूम्र या धूम (वायुवत गैस) को उजागर किया। यह प्रश्न वैज्ञानिकों के लिए अनुत्तरित पहेली है कि मन्त्रद्रष्टा ऋषियों ने महाग्निपुंज सूर्यदेव की यात्रा कैसे की ? ऋषिगण ब्रह्माण्ड के ग्रहों और दूसरे ब्रह्माण्ड के लोकों तक कैसे गए ? इन प्रश्नों के उत्तर के तार महर्षि भारद्वाज के यन्त्रसर्वस्व– वैमानिकशास्त्र–अंशुबोधिनीशास्त्र और महर्षि अगस्त्य की रचनाओं के तिलिस्म में हैं। महापवित्र कैलास क्षेत्र के अदृश्य रहस्यमय ज्ञानगंज–इन्द्रभवन आश्रम आदि में वर्तमान में भी सूर्यविज्ञान की विद्या दी जा रही है। बीसवीं शती के स्वामी विशुद्धानन्द परमहंस ने वर्षों ज्ञानगंज के आतशी शीशे से सूर्य किरण विभाजन कर गोपन सूर्यविद्या का प्रदर्शन किया (पश्चिमीजगत के श्री पॉल ब्रण्टन ने स्वामी विशुद्धानन्द परमहंस का वर्णन गुप्त भारत की खोज में किया।)।

सात अध्यायों का श्री सूर्यगीता में होना प्रतीक विद्या है (सूर्य की सात किरणें हैं। उर्ध्व में सात लोक और नीचे सात लोक हैं। आदिदेव सविता से जिज्ञासा करनेवाले भी सप्तर्षि हैं।)। श्री सूर्यगीता को महर्षि व्यासजी से सूतजी महाराज के मध्य संवाद के रूप में प्रस्तुत किया है। महर्षि व्यासजी ने श्री सूर्यदेव द्वारा सप्तर्षियों को उद्घाटित ज्ञान को सुनाया है। अधिकांश गीता पोथियाँ गुरु अथवा ब्रह्म और शिष्य के बीच संवाद के रूप में हैं। सर्वाधित महत्वपूर्ण 56 गीताओं में शिवगीता, अष्टावक्रगीता, अवधूतगीता, शम्भूगीता, श्रीदेवीगीता, श्रीगणेशगीता, श्रीविष्णुगीता, श्रीधीशगीता, श्रीशक्तिगीता, श्रीमद्भगवद्गीता, श्रीरामगीता, श्रीविभिषणगीता, श्रीभीष्मगीता, विद्यागीता, श्रुतिगीता, पाराशरगीता, श्रीउधवगीता, श्रीउत्तरगीता, श्रीअनुगीता, ब्रह्मगीता, श्रीगुरुगीता, यमगीता, शिवाम्बुगीता, अर्जुनगीता, श्रीहरिगीता, श्रीमोक्षगीता, श्रीऐलगीता, धर्मव्याधगीता, मंकिगीता, पिंगुलागीता, सरस्वतीगीता, शौनकगीता, सिद्धगीता, तुलसीगीता, वामदेवगीता, विचख्नुगीता, बकगीता, गायत्रीगीता, हरीतगीता, जीवन्मुक्तिगीता, नहुषगीता, काश्यपगीता, पृथिवीगीता, उतथ्यगीता, पितृगीता, अगस्त्यगीता, ऋभुगीता, शान्तिगीता, पाण्डवगीता, ऋषभगीता, याज्ञवल्क्यगीता, युधिष्ठिरगीता, कपिलगीता, ईश्वरगीता, रुद्रगीता, ब्राह्मण आदि हैं।

श्री सूर्यदेव की आधिदैविक अध्यात्मिक सत्ता से सृष्टि रचना का वर्णन बहुत संकेतात्मक गूढ़ शैली में मिलता है। यही सृष्टि विज्ञान का मूलाधार है। प्रकारान्तर में सृष्टि के रचियता सवितादेव ने पृथिवीलोक और उसमें भारतवर्ष (वर्ष का अर्थ देश लें) का सुन्दर वर्णन किया (यहाँ स्मरण रहे

कि देववाणी वेद का दिव्य श्रवण द्रष्टा ऋषियों–ऋषिकाओं ने परमपवित्र सरस्वती–द्वषद्वती नदियों के समीप किया। सृष्टि विज्ञान ऋग्वेद से सम्बन्धित भूलोक ब्रह्मविद्या का क्षेत्र है।)। आदिदेव ने सात्त्विक और तामसी शक्ति की व्याख्या नये रूप में की। इसे उर्ध्वलोक के देवताओं (सात्त्विक) और पाताललोक के दानवों (तामसी) में संग्राम की संज्ञा दी। श्री सूर्यदेव ने स्पष्ट किया कि "दैत्य और देवों का वेद एवं धर्म पर समान अधिकार है।" यह उल्लेखनीय है कि दोनों एक ही पिता की सन्तान हैं। दोनों वेद–वेदांग में पारंगत हैं। दोनों में प्रवृत्ति का अन्तर है।

भगवद्ज्ञान और भगवद्शक्ति केन्द्र दोनों हमेशा से ऋषियों की जिज्ञासा के विषय रहे हैं। श्री सूर्यदेव ने बहुत ही सहज रूप से व्याख्या की कि मानव के पंच कोषों में भगवद्शक्ति और अन्तःकरण में आत्मज्ञान स्वरूप ब्रह्म प्रकट होते हैं। निरन्तर सद्कर्म और उपासना से ही ब्रह्मज्ञान की प्राप्ति सम्भव है। इसलिए मन और चित्त को शुद्ध करना, मल या निरंजन रहित करना प्राथमिक रूप से अनिवार्यता है। श्रीसूर्यदेव ने अधिदैव सृष्टि, देवता एवं ऋणत्रीय, पितर ऋषि सम्बन्ध, अध्यात्म आदि का गूढ़ ज्ञान सप्तर्षियों को दिया।

इस गीता में श्री सूर्यदेवने सगुण, साकार, साकाम, सचल, सकल ब्रह्म के अलौकिक रूप से साक्षात्कार कराया। उन्होंने स्पष्ट किया कि सगुण, साकार, साकाम, सचल, सकल ब्रह्म में सत्– चित्त– ज्ञान– तेज– शक्ति समाहित होती है। श्री सूर्यदेव ने पंचदेवोपासना के रहस्य की सरल व्याख्या की। उनका मत है कि हर और हरि अभिन्न हैं। उन्होंने प्रकृति स्रोत और पुरुष स्रोत का निरूपण करते हुए उपासना में भक्ति के महत्व को समझाया।

सप्तर्षियों की मूल जिज्ञासा प्राणी या जीव की निवृत्ति को लेकर रही। प्रवृत्ति से निवृत्ति महापथ अथवा अविद्या से विद्या (ब्रह्मज्ञान), संचित कर्मों–प्रारब्ध के भेद, माया–प्रपंच और पुण्यात्मा के पतन ज्वलन्त प्रश्न रहे। श्री सूर्यदेव ने स्पष्ट रूप से कहा कि ज्ञान– कर्म– उपासना तीनों विदेह मुक्ति तक करना आवश्यक है। उन्होंने पंचकर्मों औपनिषदी–स्मार्ता–श्रौता–तान्त्रिक–पौराणिक और कर्मत्याग के फलों को समझाया। "यह अभूतपूर्व है कि पुण्य आत्माओं से भी पाप कर्म होने पर दुर्जन्म देना पड़ता है।" सर्वेश्वर सूर्य ने अशुद्ध और शुद्ध कर्मों की व्याख्या की। उनके अनुसार बाह्य और अन्तःकरण की शुद्धि आवश्यक है। "इसलिए कर्मबन्धन मुक्ति के लिए सभी कर्म ब्रह्म को समर्पित करने चाहिए। यानी कर्ता का भाव नहीं हो।"

धर्म–उपासना–तपश्चर्या के विभिन्न तरीकों में अहम् श्रद्धा–विश्वास–समर्पण–ध्यान–भक्ति–भाव को बताया है। इन्हीं से ब्रह्म से आत्मसाक्षात्कार होना निश्चित है। श्री सूर्यगीता में सप्तर्षियों ने आदिदेव सूर्य के विराट् स्वरूप के दिव्य दर्शन की कामना व्यक्त की। सर्वेश्वर सूर्य ने सप्तर्षियों को दिव्य चक्षु प्रदान किए। सप्तऋषियों ने दिव्य चक्षु से परब्रह्म सूर्य के विराट् स्वरूप का दर्शन किया। सप्तर्षिगण सूर्यदेव के विराट् स्वरूप को करोड़ों सूर्यों के समान प्रकाशवान चकाचौंध करनेवाले आभा महण्डल को देखने की स्थिति में नहीं थे। अन्त में सप्तर्षियों ने आदिदेव सूर्य से सौम्य स्वरूप में प्रकट होने की प्रार्थना की। उनके द्वारा निरन्तर स्तुति से विश्वेश्वर जगत् की आत्मा सूर्य प्रसन्न हुए। महर्षि व्यासजी महाराज ने सप्तर्षियों के सामने प्रकट श्रीसूर्यदेव के सौम्य स्वरूप का मनोहारी वर्णन किया है।

परब्रह्म श्री सूर्यदेव ने भक्ति, पराभक्ति, मन्त्रयोग, हठयोग, राजयोग और लययोग के मूलभूत तत्त्व की भी व्याख्या की। अन्त में श्रीसूर्यदेव ने ऋषिगण के जीवन मुक्त के लक्षण, विदेहमुक्त कर्म आदि के सिद्धान्त दर्शन के तत्त्व का उपदेश दिया। उन्होंने सहज रूप से विदेहमुक्त महात्म रूप की विवेचना की। उन्होंने स्वानुभूति के सर्वोच्च शिखर का ब्योरा दिया। साथ ही गुरुभक्ति के शुभ फलों का वर्णन किया। सारसंक्षेप में सात अध्यायों में श्री सूर्यदेव ने अध्यात्म–अध्यात्मिक कर्म–उपासना–चिन्तन के तत्त्वज्ञान का सागर प्रस्तुत किया है। श्रीसूर्यगीता अध्यात्म तत्त्व, सनातन ज्ञान (धर्म), वेद विज्ञान की त्रिवेणी है। इसमें निर्गुण, निराकार, निष्काम, निष्कल ब्रह्म से सगुण उपासना के महत्व का वर्णन है। इसके अलावा बहुत ही सहज रूप से अधिदैव एवं अधिभूत तत्त्व को समझाया गया है। श्री सूर्यगीता के अनुसार अहंकार–दम्भ–सम्प्रदायिक विरोध ज्ञान–कर्म–उपासना में विघ्नकारक हैं। यह सूर्यगीता वेद मूलाधारवाली उपनिषद् के साथ ही तत्त्वज्ञानी– उपासक–भक्त तीनों ही के लिए उपयोगी है। सर्वेश्वर सूर्य उपासक सौर्यमत के लिए श्रीसूर्यगीता सर्वोत्कृष्ट आर्ष ग्रन्थ है।

आर्ष ग्रन्थों में श्रीसूर्यगीता का अहम् स्थान रहा है। ऋग्वेद के सविता और सूर्य के सूक्त अभूतपूर्व हैं। महर्षि भरद्वाज, महर्षि अगस्त्य को यह श्रेय जाता है कि उन्होंने सूर्यशक्ति से परिचय करवाया। महर्षि अगस्त्य ने द्वादश आदित्यों (सूर्यों) के दर्शन की सिंहगर्जना की (यद्यपि हमारे सौर मण्डल के सूर्य की यात्रा विज्ञान के लिए चुनौती है।)। श्रीसूर्यगीता आदिदेव सर्वेश्वर के रहस्यों से पर्दा हटाने की कुंजी है। श्रीसूर्यगीता में लिखा है कि सप्तर्षिगणों ने सूर्यलोक में छह ऋतुओं का अनुभव किया। क्या सूर्यलोक पर पृथिवी भूलोक

की भांति ऋतु क्रम है? दूसरा प्रश्न उठता है कि यह सूर्यलोक कहाँ है ? परमव्योम (परमब्रह्माण्ड) में ऋग्वेद वर्णित सवितादेवता का लोक अनन्त रहस्यों के घेरे में हैं।।ऊँ।।

साभारः श्री भारतधर्म्म महामण्डल के शास्त्र प्रकाश विभाग, काशी
द्वारा प्रकाशित, सम्वत 1975:
श्री सूर्य्य गीता

।श्रीसवित्रे परमात्मने नमः।

।।श्रीसूर्य्यगीता।।

।।भाषानुवादसहिता।।

सूत उवाच।।१।।

यज्ज्ञानाऽमृतपानेन योगिनस्तत्त्वदर्शिनः।
विन्दन्ति ब्रह्मसारुप्यं भगवन्! ब्रूहि तन्मम।।२।।

व्यास उवाच।।३।।

तापत्रयोन्मूलकरीं योगमार्गप्रदर्शिकाम्।
अध्यात्मभावसम्पूर्णां सूर्य्यगीतामनुत्तमाम्।।४।।
इदानीं वच्मि ते सूत! या देवैरपि न श्रुता।
सप्तर्षिभिः पुरा प्राप्ता सूर्य्यदेवप्रसादतः।।५।।

सूतजी बोले।।१।।

हे भगवान! जिस ज्ञानरूपी अमृतके पानसे तत्त्वदर्शी योगिगण ब्रह्मासरुप्य को प्राप्त करते हैं, उसको मुझे सुनाइये।।२।।

श्रीमहर्षि वेदव्यासने कहा।।३।।

हे सूत! तीनों तापों को उन्मूलन करनेवाली, योगमार्ग को दिखाने वाली और अध्यात्मभावों से पूर्ण सूर्यगीता, जिससे उत्तम कुछ भी नहीं है, जो देवताओं ने भी नहीं सुनी है और पुराकाल में सूर्यदेव के प्रसाद से सप्तर्षियों ने प्राप्त की थी, इस समय मैं वही सुनाता हूँ ।।४।।

जगतां हितमिच्छन्तः पुरा सप्तर्षयो ध्रुवम्।

सौरे लोके विभुं सूर्य्यं द्रष्टुमासन्नुपस्थिताः।।६।।
तेजोमयोऽपि लोकः सः शैत्यसौन्दर्य्यपूरितः।
ऋतवः षड्विराजन्ते सदा तत्र समं मुदा।।७।।
दिव्ये तस्मिन् चिराराध्ये सूर्य्यादधिकमादरं।
लब्ध्वा सप्तर्षयः सद्यः प्रार्थयन्त कृतांजलि।।८।।

ऋषय ऊचुः।।६।।

विश्वप्रकाशक! श्रीमन्! सर्वशक्तिनिकेतन!।
जगन्नियन्तः! सर्व्वेश! विश्वप्राणाश्रय! प्रभो!।।१०।।
कर्म्मोपास्तिज्ञानसाधुरहस्यं कृपया गुरो!।
त्रितापतप्तजीवाना मुद्धारायोपदिश्यताम्।।११।।
येनोपायोन जीवानां मुक्तिः संसारबन्धनात्।
जायते दयया तन्नः श्रावयेर्विश्वतत्त्ववित्!।।१२।।

जगत् के हित की इच्छा करने वाले सप्तर्षि पूर्वकाल में विभु सूर्यदेव के दर्शन करने के लिये सूर्यलोक में जाकर उपस्थित हुए। यद्यपि वह तेजोमय लोक है, तथापि शीत और सुन्दरता से पूर्ण है। वहां पर षड्ऋतु निरन्तर आनन्द के साथ विराजते हैं। उस चिराराध्य दिव्यलोक में सूर्यदेव से अधिक आदर प्राप्त कर सप्तर्षि उसी समय हाथ जोड़कर प्रार्थना करने लगे।।६–८।।

सप्तर्षियों ने कहा।।६।।

हे विश्व को प्रकाश करनेवाले! हे कान्तिमान् ! हे सर्वशक्तियों के स्थान! हे जगत् के नियन्ता। हे सर्वेश्वर! हे संसार के प्राणाधार! हे प्रभो! हे गुरो! त्रितापसे तप्त जीवों के उद्धारार्थ कृपा करके कर्म, उपासना और ज्ञान के उत्तम रहस्य का उपदेश करिये।।१०–११।। हे विश्व के तत्त्वों को जाननेवाले! जिस उपाय से जीवों की संसार बन्धन से मुक्ति होती है, उसे दया करके हमें सुनाइये।।१२।।

अधिदैवरहस्यस्य बिना ज्ञानं न शक्यते।
ज्ञातुं कर्म्मोपासनाधीसामंजस्यं सुदुर्ग्रहम्।।१३।।
अनन्त! विश्वेश! गुरो! जिज्ञासव इमे ततः।
तत्सर्व्वं श्रावयित्वा नोऽनुगृहाणाऽनुकम्पया।।१४।।

श्रीसूर्य्य उवाच।।१५।।

सर्वेषां ज्योतिषां ज्योतिः प्रकाशानां प्रकाशकः।
अहमेवाऽस्मि सर्वासां शक्तिनामाश्रयस्तथा।।१६।।
अन्ये ये च ग्रहा विप्राः! तथैवोपग्रहाश्च ये।
नित्यं प्रदक्षिणीकृत्य मामेवैते समाश्रिताः।।१७।।

ब्रह्माण्डं देहपिण्डंच सर्वं में सत्तया स्थितम्।
अनन्तसूर्यलोकास्ते उपग्रहगणैर्ग्रहैः।।१८।।
अनन्तैः सह मे सक्ता आज्ञानां पालनेऽनघाः!।
तथा संख्याविहीनास्ते लोकाः सूर्यादिनामकाः।।१९।।
अनन्तग्रहलोकास्त उपग्रहगणास्तथा।
आद्यन्तरहिते चेमे विराड्वपुषि मे स्थिताः।।२०।।

अधिदैव रहस्य का ज्ञान विना हुए कर्म उपासना और ज्ञान का कठिन सामंजस्य ज्ञात नहीं हो सकता।।१३।। हे अनन्त! हे विश्वनाथ! हे गुरो! हम तो जिज्ञासु हैं, इस कारण वह सब कृपया सुनाकर आप हमें अनुगृहीत करें।।१४।।

श्रीसूर्यदेव ने आज्ञा की।।१५।।

मैं ही सब तेजों का तेज, प्रकाशों का प्रकाशक और सब शक्तियों का आश्रय हूँ।।१६।। हे विप्रो! अन्य जितने ग्रह और उपग्रह हैं, वे सब निरन्तर मेरी ही प्रदक्षिणा करते हुए मेरे आश्रय से रहते हैं।।१७।। समस्त पिण्ड और ब्रह्माण्ड मेरी ही सत्ता से स्थित हैं। हे निष्पापो! अनन्त ग्रहगण और उपग्रहों के साथ अनन्त सूर्यलोक मेरी आज्ञा पालन करने में तत्पर हैं। इसी तरह सूर्यादि असंख्य लोक, अनन्त ग्रहलोक और अनगिनती उपग्रहगण, आदि अन्तरहित मेरे विराट्शरीर में स्थित हैं।।१८–२०।।

ब्रह्माण्डानि च पिण्डानि समष्टिव्यष्टिभेदतः।
परस्परविमिश्रानि सन्त्यनन्तानि संख्यया।।२१।।
प्रतिब्रह्माण्डमनिशं ब्रह्मविष्णुहरादयः।
सृष्टिस्थितिलयान् स्वैरं कुर्वते स्वविभागतः।।२२।।
तथैवर्षिगणैर्देवैः पितृभिश्च विभागशः।
अध्यात्ममधिदैवंचाधिभूतं कर्म्म तन्यते।।२३।।
ब्रह्माण्डेषु च लोकास्ते सप्तोर्ध्वमध एव च।
प्राणिनामिह भोगार्थं भोगलोका मता इमे।।२४।।
स्वर्गो नरक इत्येवं पितृलोकादयस्तथा।
कर्मपाशयता जीवा यत्रायान्ति च यान्ति च।।२५।।
अथेयं भोगभूरुक्ता कर्मभूः श्रूयतां बुधाः।
एतेष्वेवाऽस्ति लोकेषु चतुर्दशसु शोभनः।।२६।।
योऽयं भूलोक एवासौ कर्मभूरवधार्यताम्।
तत्राऽपि गीयते योऽयमार्यावर्तः स एव सा।।२७।।

ब्रह्माण्ड और पिण्ड, समष्टि और व्यष्टि भेदसे परस्पर मिले हुए हैं और उनकी संख्या अनन्त है।।२१।। प्रत्येक ब्रह्माण्ड में ब्रह्मा, विष्णु, महेश आदि स्वतंत्रतापूर्वक अपने–अपने विभागानुसार निरन्तर सृष्टि, स्थिति और लयका कार्य किया करते हैं।।२२।। इसी तरह ऋषिगण, देवगण और पितृगण द्वारा अपने अपने विभागानुसार अध्यात्म, अधिदेव और अधिभूत कर्मों का सम्पादन होता है।।२३।। ब्रह्माण्ड में सात उद्ध्र्व और सात अधोलोक हैं। प्राणियों के भोग के लिए होने के कारण उन्हें भोगलोक कहते हैं।।२४।। स्वर्ग, नरक और पितृलोकादिमें कर्मपाशबद्ध जीव यातायात करते रहते हैं।।२५।। यह भोगभूमि कही गयी है, अब हे विज्ञों! कर्मभूमि का वर्णन श्रवण करें। उक्त चतुर्दश लोकों में अत्यन्त शोभायुक्त जो यह भूलोक है, इसी को कर्मभूमि समझें। भूलोक में भी जिसे आर्यावर्त कहते हैं, वही कर्मभूमि है।।२६–२७।।

यस्योत्तरस्यां बहुभिस्तरुगुल्मलतादिभिः।
वृतो हिमगिरिर्भाति बहुधातुविमण्डितः।।२८।।
दक्षिणस्यां समुद्रेण सहितो विन्ध्यपर्वतः।
पूर्वस्यां सागरोऽनेकनदनद्यादिसंयुतः।।२९।।
नदः सिन्धुः प्रतीच्यां च नदिभिः पंचभिः सह।
त इमेऽस्याः प्रसिद्धायाः कर्मभूमेर्विभाजकाः।।३०।।
देवा अप्यत्र वांछन्ति जन्म कर्मभुवि स्वकम्।
वैदिकी दृश्यते पूर्णाक्रियाप्यत्रैव नित्यशः।।३१।।
पूर्णा च मानवी सृष्टिः कर्मभुंयेव जायते।
धर्मोऽपि पूर्णतोऽत्रैवाऽवतारोऽपि तथा मम।।३२।।
लीलाविग्रहमाधाय दुष्टान् निध्नन् सतोऽवति।
रहस्यं सूक्ष्मलोकानां गूढं शृणुत सत्तमाः!।।३३।।
येन वो विमला बुद्धिर्जनिष्यत इहादरात्।
द्विधा ममाऽस्ति वै शक्तिर्विभक्ता पृथिवीतले।।३४।।

जिसके उत्तर में बहुत से वृक्ष गुल्म और लता आदि से युक्त एवं विविध धातुओं से मण्डित हिमालय पर्वत शोभा पा रहा है।।२८।। दक्षिण में समुद्र के साथ विन्ध्य नामक पर्वत स्थित है। पूर्व में नद नदियों से युक्त महासागर तथा पश्चिम में पाँच नदियों से युक्त सिन्धु नामक नद विराजमान है। ये ही सब इस प्रसिद्ध कर्मभूमि के विभाजक (चतुस्सीमा के प्रदर्शक) हैं।।२९–३०।। इस कर्मभूमि में जन्म ग्रहण करने की देवता लोग भी इच्छा करते हैं। यहाँ पर नित्यशः वैदिकी क्रियायें पूर्णरूप से देख पड़ती हैं।।३१।। कर्मभूमि में ही पूर्णमानवी सृष्टि होती है। यहीं पूर्णरूप से धर्म का अस्तित्व है

और यहीं भगवान् लीलाविग्रह (अवतार) धारण कर दुष्टों का दमन और सज्जनों का सरंक्षण किया करते हैं। अब हे श्रेष्ठ पुरुषों! सूक्ष्मलोकों के गूढ़ रहस्य को आदर के साथ सुनो।।३२–३३।। जिससे आपकी बुद्धि निर्मल होगी। पृथ्वीतल पर मेरी शक्ति दो भागों में विभक्त है। एक सात्त्विकी और दूसरी तामसी।

सात्त्विकी तामसी चेति ह्यधितिष्ठन्ति यां सदा।
देवाश्च दानवाश्चैव मदाज्ञावशवर्त्तिनः।।३५।।
देवानामूर्ध्वलोकेषु स्थितिः स्वाभाविकी मता।
असुराणामधोलोके वसतिर्विनिवेशिता।।३६।।
तथा देवासुरं युद्धं मध्ये मध्येऽत्र जायते।
असुराः कर्म्मव्यत्यासात् देवांजित्वा स्वशक्तितः।।३७।।
कियन्तमधिकारंच तेषां ते कुर्वते स्वयम्।
देवा अपि प्रसादान्मे पुनर्जित्वाऽसुराँस्तथा।।३८।।
स्वाधिकारं समाश्रित्य पुनर्नन्दन्ति निर्भयाः।
देवानांचासुराणांचाधिकारे साम्यतां गते।।३९।।
ब्रह्माण्डेषु च धर्मस्य स्थितिर्याथार्थ्यतो मता।
देवास्तथर्षयः सर्वे मेऽवतार इव क्षितौ।।४०।।
धृत्वाऽवतारं मे ज्ञानशक्त्योः साम्यं वितन्वते।
मज्ज्ञानं ज्ञानिनामन्तर्नित्यं भासयतेऽखिलम्।।४१।।

मेरी आज्ञा के वशवर्ती होकर देवता और दानव क्रमशः इन दोनों शक्तियों में अधिष्ठान करते हैं।।३४–३५।। देवताओं की स्थिति स्वाभाविक रूप से ऊद्र्ध्व लोक में और दानवों की अधोलोक में है।।३६।। परन्तु बीच–बीच में देवासुर संग्राम हुआ करता है। असुरगण कर्म के विपर्ययद्वारा अपनी शक्ति को बढ़ाकर देवताओं को जीत लेते और उनके कितने ही अधिकार स्वयम् चलाने लगते हैं। देवतागण भी पुनः मेरे प्रसाद से असुरों को जीत कर अपना अधिकार पाते हैं और निर्भय होकर आनन्द में रहने लगते हैं। देवता और असुरों के अधिकार की साम्यता होने पर ब्रह्माण्ड में धर्म की यथार्थ रूप में स्थिति होती है। देवता तथा ऋषिगण पृथ्वीपर ईश्वरावतार समान अवतार धारणकर मेरे ज्ञान और शक्तियों की साम्यता का प्रचार करते हैं। मेरा ज्ञान ज्ञानियों के अन्तःकरण में नित्य ही सम्पूर्ण जगत् को दिखला देता है।।३७–४१।।

पंचकोषेषु शक्तिर्मे तथा तिष्ठति नित्यशः।
न पश्यन्ति तु तां शक्तिमज्ञानोपहता नराः।।४२।।

यावतीं प्रौढतां याति साधकः साधनाध्वनि।
तावत्स पंचकोशानां साहाय्यान्मां प्रपद्यते।।४३।।
सूक्ष्मेण दिव्यलोकेन स्थूललोकस्य देहिनः।
सम्बन्धकारको ज्ञेयः कोशः प्राणमयश्चर।।४४।।
यदि प्राणमये कोशे पीठं स्थापयितुं क्षमः।
कथंचित् स हि मे शक्तिं दैवीमनुभवत्यसौ।।४५।।
पंचकोशा अपि व्यष्टिसमष्ट्योर्भेदतः सदा।
ऐक्यमेवाश्रयन्तीति यूयं श्रोतुं ततोऽर्हथ।।४६।।
समष्टिरूपकोशस्य रहस्यं व्यष्टिकोशके।
आविर्भवति नित्यं तन्नात्र कार्या विचारणा।।४७।।
यदा कुण्डलिनी शक्तिराविर्भवति साधके।
तदा स पंचकोशे मत्तेजोऽनुभवति ध्रुवम्।।४८।।

मेरी शक्ति पंचकोषों में निरन्तर रहती है, परन्तु उस शक्ति को अज्ञानी पुरुष देख नहीं सकते।।४२।। साधन मार्ग में साधक जितना ही अग्रसर होगा, पंचकोषों की सहायता से उतना ही वह मेरे निकट पहुँचेगा।।४३।। क्रियाशील प्राणमय कोषको स्थूललोक के प्राणीका सूक्ष्म दिव्यलोक के साथ सम्बन्ध करा देने वाला जानना चाहिये।।४४।। यदि प्राणमयकोष में कोई पीठ स्थापन कर सके, तो वह कथंचित् मेरी इस दैवी शक्ति का अनुभव कर सकेगा।।४५।। पंचकोष भी व्यष्टि और समष्टिके भेद से निरन्तर ऐक्यका ही आश्रय करते हैं, इस विषयको आप सुनें।।४६।। समष्टिरूप कोष के रहस्य का व्यष्टि कोष में नित्य रूप से आविर्भाव होता है, इसमें सन्देह करने का प्रयोजन नहीं।।४७।। साधक में जब कुण्डलिनी शक्ति का आविर्भाव होता है, तब वह अवश्य ही पंचकोषों में मेरे तेज का अनुभव करता है।।४८।।

द्रव्यमन्त्रमनःशुद्ध्या तथा तच्छक्तियोगतः।
स्थूलेऽपि दिव्यदेशेऽस्मिन् पीठाविर्भूतिरिष्यते।।४९।।
पीठसाहाय्यमाश्रित्य तीर्थप्रस्तरविग्रहे।
आविर्भवति में शक्तिर्दैवीत्येतद्विनिश्चितम्।।५०।।
तीर्थानि दिव्यदेशाश्चाप्यनेके परिकीर्त्तिताः।।
कर्मोपास्तिप्रभावेण स्थूललोकेऽपि साधकाः।।५१।।
एवं विधानां पीठानां प्रतिष्ठां कुर्वते सदा।
उपास्तिः सात्त्विकत्वादिभेदेन त्रिविधा मता।।५२।।
तद्वत्पीठाश्रयं प्राप्य ऋषींन्देवान् पितृँस्तथा।

असुरान् शक्तिभूतान्मे प्रत्यक्षं वीक्षते मुदा।।५३।।
सत्त्वादिगुणभेदे न साधकस्य समीहया।
एतासां मम शक्तिनां दर्शनं तिसृणां पृथक्।।५४।।
साधकानामथ स्थूले लोके पीठप्रतिष्ठया।
मां द्रष्टुं मद्विभूतीर्वा कुमारीबटुविग्रहाः।।५५।।
मुद्राशवाग्नियन्त्राणि वपुः स्वीयं तथैव च।
मुख्यावलम्बनान्याहुरष्टैवेतानि सर्वथा।।५६।।

उसी की शक्ति से और द्रव्य, मन्त्र तथा मनकी शुद्धि से इस स्थूल दिव्य देश में भी पीठों का आविर्भाव होता है।।४६।। इसमें सन्देह नहीं कि, पीठ की सहायता का आश्रय कर तीर्थ में और पाषाणमयी मूर्ति में मेरी दैवी शक्ति का आविर्भाव होता है।।५०।। तीर्थ और दिव्यदेश अनेक कहे गये हैं। साधकगण कर्म एवम् उपासना के प्रभाव से स्थूल लोक में भी इस प्रकार के पीठों की सदा प्रतिष्ठा किया करते हैं। सात्त्विकादिभेद से उपासना तीन प्रकार की होती है।।५१–५२।। तदनुसार पीठ का आश्रय कर मेरे शक्तिभूत ऋषि, देवता, पितर और असुरों को साधक प्रसन्नता से प्रत्यक्ष देख सकता है।।।५३।। सत्त्वादिगुण भेद से साधक अपने इच्छानुसार मेरी उक्त तीनों शक्तियों का पृथक्पृथक् स्वरूप देख सकते हैं।।५४।। साधकों के अर्थ स्थूल लोक में पीठ प्रतिष्ठा द्वारा मुझको या मेरी विभूतिको देखने के लिये कुमारी, बटुक, मूर्ति, मुद्रा, शव, अग्नि, यन्त्र और निज शरीर ये ही आठ प्रधान अवलम्बन कहे गये हैं।।५५–५६।। (यहाँ इनके शाब्दिक अर्थ के स्थान पर अन्तर्निहित अर्थ लें।)

तत्रापि देवरूपाणि तत्त्वानामग्नितत्त्वकम्।
मुख्यावलम्वनं प्राहुस्तत्त्वमध्यगतं हि तत्।।५७।।
तथा मुद्रा मता लोके स्त्रीपुंस्तदुभयात्रिधा।
इयं मुद्रा तु बहुभिश्चक्रशब्देन चोच्यते।।५८।।
तस्यापि भेदाः सप्तेति विदुः केचन योगिनः।
यन्त्राण्यप्यमितान्याहुर्योगिनो यन्त्रवेदिनः।।५६।।
पीठोत्पन्नकरेष्वषु साधनेष्वष्टकेष्वपि।
योगिभिस्तु निजं देहं साधनोत्तममीरितम्।।६०।।
अष्टासु कारणेष्वेषु द्रव्यमन्त्रविशुद्धितः।
मनसः संयमेनापि कोशे प्राणमये ध्रुवम्।।६१।।
पीठमुत्पद्यते तस्मिन् कोशे तत्र प्रतिष्ठिते।
आविर्भवन्ति मे सर्वाः शक्तयस्तत्र निश्चितम्।।६२।।

किन्तु द्रव्यमनःशुद्धिमन्त्रशुद्ध्याद्यभावतः।
तथोपासनया चापि दिग्बन्धादिप्रयत्नतः।।६३।।
पीठस्थानस्य रक्षा चेत्समीचीना भवेन्न हि।
तथोक्तस्य च योगस्य पवित्रत्वाद्यभावतः।।६४।।

उनमें भी देवताओं की मूर्तियाँ और सब तत्त्वों का मध्यवर्ती अग्नितत्व प्रधान अवलम्बन है।।५७।। मुद्रा भी स्त्रीमुद्रा, पुंमुद्रा और उभयात्मिक मुद्रा इस प्रकार से त्रिविध हैं। इस मुद्रा को बहुत से लोग चक्र भी कहते हैं।।५८।। कोई–कोई योगी उसके सात भेद मानते हैं। यन्त्रवेत्ता योगियों ने यन्त्र भी बहुत तरह के कहे हैं।।५६।। पीठ को उत्पन्न करनेवाले आठ साधनों में योगियों ने निजदेह को ही उत्तम साधन कहा है।।६०।। इन आठों अवलम्बनों में द्रव्यशुद्धि और मन्त्रशुद्धि द्वारा एवम् मनका संयम करने से प्राणमय कोष में पीठ उत्पन्न होता है। प्राणमय कोष में पीठ प्रतिष्ठित होने से वहां निश्चय ही मेरी सब शक्तियों का आविर्भाव होता है।।६१–६२।। किन्तु द्रव्यशुद्धि, मनःशुद्धि और मन्त्रशुद्धि आदि के न होने से तथा उपासना और दिग्बन्धादि के प्रयत्न से पीठस्थान की भलीभांति रक्षा ठीक न हुई तो उक्त योग में पवित्रता आदि के अभाव से असुरों द्वारा अनेक विघ्न उपस्थित होते हैं।

बहवस्तत्र जायन्तेऽन्तराया असुरैः कृताः।
मनःसंयमिनो! वच्मि युष्मद् भव्याय साम्प्रतम्।।६५।।
नास्त्यस्मात्सुगमः पन्था निर्भयश्चाप्यथोत्तमः।
योगिनो जगतश्चास्य श्रेयःसंपादनेहया।।६६।।
पीठं संस्थाप्य मां वापि मच्छक्तीर्द्रष्टुमिच्छतः।
स्वान्तःकरणमेवास्य साधनं चोत्तमोत्तम्।।६७।।
तत्वज्ञाः!पुरतो वोऽहं जगच्छ्रेयोऽभिलाषया।
अतिगूढं रहस्यं तच्छृणुध्वं यद्ब्रवीम्यहम्।।६८।।
वाङ्मनोऽगोचराया मे शक्तेर्भेदाः क्रमेण ह।
चत्वार ईरिताः स्थूलसूक्ष्मकारणभेदतः।।६६।।
चतुर्थस्त तुरीयः स्याज्ज्ञानरूपो न संशयः।
निश्चलो हि ममांगे से सततं तिष्ठति ध्रुवम्।।७०।।
या च कारणरूपा मे तृतीया शक्तिरस्ति सा।
ब्रह्मविष्णुमहेशानां जनयित्री मता परा।।७१।।

इसलिये हे मनका संयम करनेवालो! मैं आपकी भलाई के हेतु इस समय कहता हूँ।।६३–६५।। कि योगिगण इस जगत् के मंगल कामनार्थ मुझे या मेरी शक्तियों को देखने की इच्छा से पीठ की संस्थापना के लिये अपने

अन्तःकरण को ही उत्तमोत्तम साधन समझते हैं। इससे सुगम, निर्भय और उत्तम अन्य मार्ग नहीं है।।६६–६७।। हे तत्त्वज्ञानियो! आपके सामने जगत्कल्याणकी अभिलाषासे मैं अत्यन्त गूढ़ रहस्य कहता हूँ, उसे सुनिये।। ६८।। वाणी और मनसे अगोचर जो मेरी शक्ति है, उसके भेद क्रमशः चार कहे गये हैं। यथा स्थूल, सूक्ष्म, कारण और चौथा तुरीय। तुरीय शक्ति ज्ञानस्वरूप है, इसमें सन्देह नहीं। यही तुरीयशक्ति निश्चल रूप से मेरे अंग में निरन्तर रहती है।।६६–७०।। मेरी कारणरूपा तृतीय शक्ति ब्रह्मा, विष्णु और महेश की जननी है।।७१।।

द्वितीयस्याश्च सूक्ष्माया साहाय्येन त्रयस्त्विमे।
ब्रह्माण्डजनुराधानस्थितिनाशकरा मताः।।७२।।
स्थूला तु दृश्यमानेऽत्र संसारेऽनन्रुपतां।
कुर्वती चाऽपि वैचित्र्यं व्याप्नोत्यप्यखिलं जगत्।।७३।।
इयं तु सप्तधा भिन्ना योगिभिर्दृश्यते सदा।
अस्या एव हि मे शक्तेराधारेष्वष्टसु ध्रुवम्।।७४।।
साहाय्येनैव दिव्यानां पीठानामुद्भवः स्मृतः।
प्रोक्ताः सर्वे इमे भेदाश्चिच्छक्तेरेव मे मताः।।७५।।
पीठसाहाय्यतश्चैवं भक्तिमानुक्तसाधकः।
सूक्ष्मसम्बनधितामेत्य दृष्ट्वा शक्तीर्ममामिताः।।७६।।
तथा मे शतशो लोक विभूतीः परिदृश्य च।
कृतकृत्यत्वमेवैतीत्येतज्जानीत निश्चितम्।।७७।।
इह यावन्ति तीर्थानि तानि पीठानि संजगुः।
पीठशक्तियुतान्यत्र सन्ति तीर्थान्यनेकशः।।७८।।
केषुचित्तीर्थदेशेषु शक्ति में संततं स्थिता।
केषुचित्तु यथाकालं भक्तिश्रद्धायुता नराः।।७६।।

द्वितीय सूक्ष्मशक्ति की सहायता से ब्रह्मा विष्णु महेश ब्रह्माण्ड का सृजन, पालन और संहार किया करते हैं।।७२।। और प्रथमा स्थूलशक्ति इस दृश्यमान संसार में अनन्तरूप बनाया करती है, एवं सम्पूर्ण जगत् में विचित्रताको उत्पन्न करती हुई व्यापक रूप से स्थित रहती है।।७३।। योगिगण इस शक्ति को सप्तधा विभक्त देखते हैं। इसी में मेरी शक्ति की सहायता से आठ आधारों में दिव्यपीठों का प्रादुर्भाव होता है। ये सब भेद मेरी चित्शक्ति के ही कहे गये हैं।।।७४–७५।। पीठ की सहायता से पूर्वोक्त भक्तिमान् साधक सूक्ष्मसम्बन्धको प्राप्त कर और मेरी असीम शक्ति को तथा संसार में मेरी असंख्य विभूतियों को देखकर कृतकृत्य हो जाता है, यह निश्चय

से जानिये।।७६–७७।। संसार में जितने तीर्थ हैं, वे सब पीठ कहे जाते हैं। ऐसे पीठशक्तियुक्त अनेक तीर्थ संसार में विद्यमान हैं।।७८।। किसी–किसी तीर्थ में मेरी शक्ति निरन्तर रहती है।

आराधयन्ति तावद्धि मम शक्तिर्विनिश्चिता।
कतिचिद्भक्तवश्यानि तीर्थानि तस्य भक्तितः।।८०।।
आविर्भवन्ति तत्रैव तिष्ठन्ति च तदिच्छया।
यथा सर्वेषु कायेषु गवां तिष्ठति गोरसः।।८१।।
तथापि गोस्तनादेव स्त्रवतीति विनिश्चितम्।
तथैव मामिका शक्तिर्विद्यमानाऽपि सर्व्वतः।।८२।।
नित्यनैमित्तिकैः पीठैराविर्भवति भूतले।
जगतां श्रेयसे विज्ञाः! शृणुध्वं यन्मयोच्यते।।८३।।
अध्यात्ममधिदैवंचाधिभूतमिति भेदतः।
ममैवेयं त्रिधा शक्ति क्रमेणैभिरधिष्ठिता।।८४।।
ऋषिभिर्देववृन्दैश्च पितृभिश्च यथाक्रमम्।
शक्ति में याऽऽसुरी चास्ति सा देव्यन्तर्गता मता।।८५।।
केवलं सत्त्वतमसो भेदेनेयन्तु भिद्यते।
देवेष्वसुरसङ्घेषु क्रमशो विनिवेशिता।।८६।।

किसी–किसी तीर्थ में जब तक मनुष्य श्रद्धाभक्तिपूर्वक समय–समय पर आराधना करते हैं, तब तक मेरी शक्ति निश्चित रूप से रहती है। कोई तीर्थ भक्त के अधीन रहते हैं। वे भक्त की भक्ति से आविर्भूत होकर उसकी इच्छा से वहीं विद्यमान रहते हैं। जिस प्रकार गोके सब शरीर में गोरस रहता है, परन्तु स्तन से ही निर्गत होता है, उसी प्रकार मेरी शक्ति सर्वत्र विद्यमान होते हुए भी पृथ्वी पर नित्य और नैमित्तिक पीठोंद्वारा आविर्भूत होती है। हे विद्वानो! संसार के कल्याण के लिये जो मैं कहता हूं उसे सुनिये।।७९–८३।। अध्यात्म, अधिदैव और अधिभूत भेदों के अनुसार मेरी यह त्रिविध शक्ति क्रमशः ऋषि, देवता और पितरों द्वारा अधिष्ठित है। मेरी आसुरी शक्ति दैवी शक्ति के ही अन्तर्गत है।।८४–८५।। केवल सात्त्विक और तामसिक भेदसे मेरी शक्ति दो भागों में विभक्त होकर वह देवता और असुर समूह में क्रमशः स्थित है।।८६।।

ऋषयो देववृन्दाश्च वहुधा परिकीर्तिताः।
नित्यनैमित्तिकाभ्यां ते भेदाभ्यां पितरो द्विधा।।८७।।
ऋषयो ज्ञानराज्यस्य देववृन्दाश्च कर्मणः।
पितरः स्थूलदेहस्य क्रमेणैते नियामकाः।।८८।।
देवानुग्रहमासाद्य सृष्टिस्थितिलयाः क्रमात्।

लोकस्यास्य प्रजायन्त इति पौराणिका विदुः।।८६।।
यज्ञादिकर्मणा देवा हृष्टपुष्टाश्च सर्वथा।
यतन्ते जगदुन्नत्यै तुष्टाश्च जीवश्रेयसे।।६०।।
आधिदैविकसृष्टेस्तु शक्र एवास्ति रक्षकः।
नरकप्रेतलोकानां धर्मराजस्तथेरितः।।६१।।
इत्थं सत्तास्ति मे दैवीशक्तिर्ब्रह्माण्डरक्षणे।
मनुष्याः श्रद्धया हीनाः क्रियाज्ञानविवर्जिताः।।६२।।
शक्नुवन्ति न मे द्रष्टुं दैवीं शक्तिमनिन्दिताम्।
माया मे मोहयत्येतान् भ्रामयन्त्यनिशं मुधा।।६३।।
वेदशास्त्रादिपाठेन तथा यज्ञादिसाधनात्।
प्रजया पितृपूजाद्यैः ऋणत्रयविमोचनात्।।६४।।

ऋषि और देववृन्द अनेक कहे गये हैं। पितर द्विविध हैं। एक नित्य और दूसरे नैमित्तिक।।८६।। ऋषिगण ज्ञान राज्य के, देवतागण कर्म के और पितर स्थूलदेह के यथाक्रम नियामक हैं।।८८।। पुराणतत्त्ववेत्ता लोग कहते हैं कि देवताओं के अनुग्रह से संसार का सृजन, पालन और संहार हुआ करता है।।८६।। यज्ञादि कर्म से देवतागण हृष्टपुष्ट और संतुष्ट होकर जगत्की उन्नति और जीवों के कल्याण के लिये सर्वथा यत्न किया करते हैं।।६०।। आधिदैविक सृष्टि के इन्द्रदेव और नरक तथा प्रेतलोकों के धर्मराज रक्षक हैं।।६१।। इस प्रकार मेरी दैवी शक्ति ब्रह्माण्ड की रक्षा करने में लगी हुई है। श्रद्धाहीन, क्रियाहीन और ज्ञानहीन मनुष्य मेरी विशुद्ध दैवी शक्ति को नहीं देख सकते। मेरी माया उन्हें व्यर्थ ही भ्रम में डालती हुई निरन्तर मोहित करती है।।६२–६३।। वेद शास्त्रादि के पाठद्वारा, यज्ञादि साधनद्वारा, सन्तानोत्पत्तिद्वारा और पितृपूजादिद्वारा तीनों ऋणों को चुका देने से और अध्यात्मिक, आधिदैविक और आधिभौतिक शुद्धि से ऋषिगण, देवगण और पितृगण सन्तुष्ट होते हैं और उससे जगज्जननी प्रसन्न होती है। तब श्रद्धायुक्त साधक पुरुष मेरी शक्ति की सहायता से मेरे स्वरूप को जानकर मोहनिद्रासे जागृत हो ज्ञानभूमि में पहुंचता है। हे विप्रो! यह देव शक्ति के पीठ का अतिविस्तृत माहात्म्य और उत्तम रहस्य मैंने तुम्हें सुनाया है।।६४–६७।। जो ब्रह्म मन और वाणी से अगोचर कहा गया है उसे सर्वकारण जानो। वही सबका अध्यात्मिक है। अनाद्यनन्त, अज, अजर, दिव्य, ध्रुव, अव्यय, अप्रतर्क्य, अविज्ञेय ब्रह्म ही पहले रहते हैं। माया नामक स्वेच्छा से ही जगत् के जन्मका आदिकारण स्वरूप ईश्वर संज्ञक जो तत्त्व है, उसे अधिदैव कहते हैं।

अध्यात्मिक्याधिदैव्याधिभौतिकीशुद्धितस्तथा।
ऋषयो देववृन्दाश्च तथा पितृगणाः सदा।।९५।।
मोदन्ते तेन जगतां जनयित्री प्रसीदति।
तदा श्रद्धायुतः शक्त्या साधको मां स्वरूपतः।।९६।।
ज्ञात्वा तीर्त्वा तमोनिद्रां ज्ञानभूमिं प्रपद्यते।
एवं वः कथितं विप्रा! रहस्यमिदमुत्तमम्।।९७।।
पीठस्य देवशक्तेश्च माहात्म्यं बहुविस्तृतम्।
यत्तद्ब्रह्म मनोवाचामगोचरमितीरितम्।।९८।।
तत्सर्व्वकारणं वित्त सर्व्वाध्यात्मिकमित्यपि।
अनाद्यन्तमजं दिव्यमजरं ध्रुवमव्ययम्।।९९।।
अप्रतर्क्यमविज्ञेयं ब्रह्माग्रे संप्रवर्तते।
स्वेच्छामायाख्यया यत्तज्जन्मादिकारणम्।।१००।।
ईश्वराख्यन्तु तत्तत्त्वमधिदैवमिति स्मृतम्।
सर्व्वज्ञः सद्गुरुर्नित्यो ह्यन्तर्यामि कृपानिधिः।।१०१।।
सर्व्वसद्गुण सारात्मा दोषशून्यः परः पुमान्।
यत्कार्य्यब्रह्म विश्वस्य विधानं प्रकृतात्मकम्।।१०२।।
विराडाख्यं स्थूलतरमधिभूतं यदुच्यते।
यस्येहावययैवर्लोकान् कल्पयन्ति मनीषिणः।।१०३।।
कट्यादिभिरधः सप्त सप्तोर्ध्वं जघनादिभिः।
कारणे त्रिविधा भावन सन्त्यस्माद्युक्तमेव हि।।१०४।।
कार्य्येऽपि तस्य त्रैविध्यं प्रत्येकावयवेष्वपि।
एतदेवाहुरध्यात्ममधिदैवाधिभौतिके ।।१०५।।
सृष्टि स्थितिलयायास्याऽधिदैवं मुख्यमीरितम्।।१०६।।

सर्वज्ञ, सद्गुरु, नित्य, अन्तर्यामी, कृपानिधि, समस्त सद्गुणों के सारस्वरूप, दोषशून्य, वे ही विराट् संज्ञक स्थूलतर अधिभूत कहलाते हैं। जिसके अवयवों से बुद्धिमानगण कटि से नीचे सात अधोलोक और कटि से ऊपर सात ऊर्ध्वलोक की कल्पना करते हैं। कारण में जिस प्रकार त्रिविध भाव ठीक–ठीक हैं, कार्य के प्रत्येक अवयव में भी वह त्रिविधता विद्यमान है। यही अध्यात्म, अधिदैव और अधिभूत रहस्य है। इस संसार की सृष्टि स्थिति और लय के लिये अध्यात्मिक, आधिदैविक तथा आधिभौतिक इन तीनों में आधिदैविक ही मुख्य कहा गया है।।९८–१०६।।

इति श्री सूर्य्यगीतासूपनिषल्सु ब्रह्मविद्यायां योगशास्त्रे सूर्य्यर्षि सम्वादेऽधिदैवरहस्यनिरूणम नाम प्रथमोऽध्यायः।।

इस प्रकार श्री सूर्य्यगीतोपनिषद् के ब्रह्मविद्यासम्बन्धि सूर्यर्षिसम्बादात्मक योगशास्त्र अधिदैवरहस्य निरुपण नामक प्रथम अध्याय समाप्त।

।।अथ द्वितीयोऽध्याय।।

ऋषय ऊचुः।।१।।

भगवन्! यच्छ्रुतं पूर्वं भक्त्यास्माभिरनुत्तमम्।
अध्यात्मभावसम्पूर्णं रहस्यं चेतसः प्रियम्।।२।।
तेन प्राक्संचितोऽस्माकं मोहोऽयं विगतोऽभवत्।
यथाऽधिदैवभावोऽपि सन्देहो नाऽस्ति नोऽधुना।।३।।
इदानीं ब्रूहि नो ब्रह्मन्! उपास्यविधिमुत्तमम्।
वाङ्मनोगोचरातीतं निराकारंच निर्गुणम्।।४।।
कथं तद्ब्रह्म पुरुषैरुपास्यं बुद्धयगोचरम्।
भगवँस्त्वं महोदारः भक्तानां तापनाशकः।।५।।
लेकोपकारनिरतः सर्व्वशक्तियुतः प्रभुः।
अतोऽस्मान् तस्य तत्त्वस्य दुर्ज्ञेयस्य विशेषतः।।६।।
सुगमां पद्धतिं प्रोच्य कृतकृत्यान् कुरुष्व नः।।७।।

सूर्य्य उवाचः ।।८।।

रहस्यं सगुणोपास्तेर्ज्ञातव्यं श्रूयतां स्फुटम्।
पंचोपास्यतमा देवा सगुणं ब्रह्म साधवः!।।६।।

महर्षियों ने कहा ।।१।।

हे भगवन्! अध्यात्मभावपूर्ण, मनोहर, अत्यन्त उत्तम जो रहस्य हम लोगों ने भक्तिपूर्वक सुना, उससे हमारा पूर्वसंचित अज्ञान नष्ट हो गया है। अधिदैवभाव के सम्बन्ध में भी हमें कोई सन्देह नहीं है। अब हे ब्रह्मन्! हमें उत्तम उपासना विधि सुनाइये। वाणी और मनसे अगोचर, निराकार, निर्गुण, बुद्धि से परे स्थित ब्रह्मकी, उपासना पुरुष कैसे कर सकेंगे? हे भगवन्! आप महान् उदार हैं, भक्तों के त्रिताप का नाश करते हैं, परोपकार में निरत हैं, सर्वशक्तिमान् हैं और सर्वसमर्थ हैं, इसलिये हमें उस विशेष दुर्ज्ञेय तत्त्व की सुगम पद्धति को सुनाकर कृतार्थ करें।।२–७।।

श्री सूर्यदेव ने आज्ञा की।।८।।

हे साधुगण! सगुण उपासना का रहस्य आपको जानना है, सो सुनिये।।६।।

निर्गुणं दुर्गमं यस्मात्सगुणोपासना ततः।
सगुणब्रह्मणः पंच श्रेष्ठान्भावन्समाश्रिता।।१०।।
निर्गुणब्रह्मणः कार्य्यं जगद्दृश्यमयं यतः।

अनन्तं निखिला भावा अनन्ता कीर्तितास्तवः।।११।।
भावातीतस्यापि परब्रह्मणः पंचभिः परैः।
भावैरुपास्तिर्विहिता सगुणब्रह्म चास्म्यहम्।।१२।।
महामाया यदाऽव्यक्ता लीनास्ति ब्रह्मणि स्वयम्।
तदाऽद्वैतपरब्रह्मभावो राजत्यलौकिकः।।१३।।
सच्चिदानन्दभावोऽसौ गम्यते यत्तयैकया।
तदा स्वरूपावस्थेयमध्यात्मेति निगद्यते।।१४।।
प्रादुरास्ते जगन्माता वेदमाता सरस्वती।
यस्या न प्रकृतिः सेयं मूलप्रकृतिसंज्ञिका।।१५।।
ब्रह्मलीना महाशक्तिर्ब्रह्मणालिंगितेव सा।
यदा विलोक्यतेऽवस्था तदैव सगुणा मता।।१६।।

उपास्यों में श्रेष्ठ पंच देव ही सगुण ब्रह्म हैं। निर्गुण की उपासना दुर्गम होने के कारण सगुण ब्रह्म के पाँच श्रेष्ठ भावों का सगुणोपासना में आश्रय किया गया है।।१०।। निर्गुण ब्रह्म का कार्य्यस्वरूप दृश्यमय जगत् अनन्त होने से उसके सम्पूर्ण भाव भी अनन्त कहे गये हैं।।११।। भावातीत पर ब्रह्म की उपासना उत्तम पाँच भावों के द्वारा करने की विधि है, और सगुण बह्म मैं ही हूँ।।१२।। महामाया जब स्वयं ब्रह्म में लीन होकर अव्यक्त अवस्था में रहती है, तब परब्रह्म का अलौकिक अद्वैत भाव प्रकाशमान रहता है।।१३।। जब केवल वह इस सच्चिदानन्द भाव में लीन होती है, तब उस स्वरूपावस्थाको अध्यात्म कहते हैं।।१४।। जगज्जननी वेदमाता सरस्वती प्रादुर्भूत होती हैं, जिनकी कोई प्रकृति नहीं और जो स्वयं मूलप्रकृति के नामसे अभिहित होती हैं।।१५।। जिस अवस्था में ब्रह्म में लीन महाशक्ति ब्रह्म से आलिंगित होने के समान देखी जाती है, उस अवस्था को सगुण अवस्था कहते हैं।।१६।।

ईश्वरोऽसावसौ चाऽधिदैवभावोऽवधार्यताम्।
ब्रह्मेशभाव एकोऽपि भिन्नवद भाति मायया।।१७।।
ब्रह्माधिदैवावस्थायामेवोपास्तिर्हि पंचधा।
पंचदेवात्मिका पंच सगुणोपासना इमाः।।१८।।
चित्प्रधानो महाविष्णुः सूर्य्यस्तेजः प्रधानकः।
शक्तिप्रधाना सा देवी विश्वशक्तिप्रकाशिनी।।१६।।
ज्ञानप्रधानो गणपः सत्प्रधानः सदाशिवः।
पंचेते विबुधा ईशाः सगुणब्रह्मसंज्ञकाः।।२०।।
पंचधा सगुणोपास्तावधिकारोऽधिकारिणाम्।

भेदतः पंचगीतासु कीर्त्तिताः पंचदेवताः।।२१।।
एत एव परा देवाः सगुणा जगदीश्वराः।
ब्रह्मविष्णुशिवादीनां जनका एत एव ते।।२२।।
ब्रह्माण्डानन्त्यतो ब्रह्मविष्णुरुद्रा मुनीश्वराः।
अनन्ता एत एवान्यानन्तत्रिदशहेतवः।।२३।।

इसी को ईश्वर भाव अथवा अधिदैव भाव जानना चाहिये। ब्रह्मभाव और ईशभाव एक ही होने पर भी वे माया के कारण भिन्नवत् प्रतीत होते हैं।।१७।। "ब्रह्मकी अधिदेव अवस्था में ही पाँच प्रकार की उपासना की विधि है। ब्रह्म की अधिदैव अवस्था में ही पाँच सगुणोपासनायें पंच देवात्मक हैं।।१८।। उनमें से महाविष्णु चित्प्रधान हैं, तेजःप्रधान सूर्यदेव हैं, शक्तिप्रधाना भगवती हैं–जो विश्व में शक्तियों का प्रकाश करती हैं। गणेशजी ज्ञान प्रधान हैं और भगवान् सदाशिव सत्प्रधान हैं। ये ही पाँच देव सगुण ब्रह्मसंज्ञक ईश्वर हैं।" ।१६–२०।। अधिकारिभेदानुसार पाँचों सगुण देवों की उपासना करने का अधिकारियों का अधिकार है और पाँचों देवताओं का वर्णन पाँचों गीताओं में पृथक्–पृथक् किया गया है। ये ही पाँच श्रेष्ठ सगुण देव जगदीश्वर हैं और ये ही ब्रह्मा, विष्णु, शिव आदि के जनक हैं।।२१–२२।। हे मुनीश्वरों! ब्रह्माण्ड अनन्त होने के कारण ब्रह्मा, विष्णु महेश अनन्त हैं और ये ही अन्यान्य अनन्त देवताओं के कारण स्वरूप हैं।।२३।।

अहमेवास्मि चिद्भावः सद्भावोऽपि भवाम्यहम्।
आनन्दभावरूपेणाऽप्यहमेवाऽस्मि सत्तमाः।।२४।।
आनन्दो व्यापकत्वेन द्वयोरेवास्ति चित्सतोः।
स्पष्टं प्रमाणमेतस्मिन् प्राज्ञास्तत्त्वबुभुत्सवः।।२५।।
व्यक्तौ विषयसम्बद्ध आनन्दः स्वनुभूयते।
चितः सतश्चानुभवे न तस्यानुभवो ध्रुवम्।।२६।।
निजचेतनसत्ताया निजास्तित्वस्य च स्वतः।
स्वस्वचैतन्यसत्ताभ्यां दृश्ये त्वनुभवस्तयोः।।२७।।
निर्गुणं ब्रह्म सगुणं निजानन्दाय जायते।
प्रकाशते च प्रकृतिपुरुषालिंगनासदयम्।।२८।।
रसो वै स इति श्रुत्या स आनन्दो रसो मतः।
स शृंगार इति प्राज्ञा जानन्ति परमर्षयः।।२६।।
शुद्धश्च मलिनश्चासौ श्रृंगारो द्विविधो रसः।
ब्रह्मानन्दमयः शुद्धो विषयानन्कोऽपरः।।३०।।

मैं ही चिद्भाव हूँ और मैं ही सद्भाव हूँ। हे महर्षियों! मैं ही आनन्दभाव भी हूँ।।२४।। चित् और सत् दोनों में आनन्द व्यापक रूप से स्थित है। हे तत्त्वजिज्ञासु महर्षियों! इस विज्ञान का स्पष्ट प्रमाण यह है कि प्रत्येक व्यक्ति में विषय से सम्बद्ध आनन्द का अनुभव होता है और वह आनन्द केवल सत् और चित् में अलग–अलग अनुभूत नहीं होता।।२५–२६।। अपनी चेतनसत्ता और अपने अस्तित्त्व का अनुभव अपने अपने चैतन्य और अस्तित्त्व के द्वारा दृश्य में होता है।।२७।। यथार्थ में निर्गुण ब्रह्म अपने आनन्द के लिये ही सगुण बन जाते हैं और प्रकृति तथा पुरुष के आलिंगन से आनन्द प्रकाशित होता है।।२८।। 'रसो वै सः' इस श्रुति से वही आनन्द 'रस' नाम से प्रसिद्ध है। हे प्राज्ञों! महान् ऋषिगण उसी को श्रृंगार करके मानते हैं।।२९।। श्रृंगार रस दो प्रकार का होता है। यथाः–शुद्ध और मलिन। ब्रह्मानन्दमय शुद्ध और विषयानन्दमय मलिन श्रृंगार है।।३०।।

महादेवीपुरुषयोर्मिथुनत्वमुदेति चेत्।
भान्ति पंच तदा भावा ब्रह्मानन्दानुकूलतः।।३१।।
चित्तेजःशक्तिविज्ञानसद्रूपाः परमा मताः
पंच भावास्तत्र चिता चेतनोऽस्मीति निश्चयः।।३२।।
प्रकृतिः प्राकृतं विश्वं देव्याश्लेषणमीश्वरे।
दृश्यास्तित्वं विराड्रू पे तेजसैव प्रकाशते।।३३।।
शक्त्या क्रियाभिव्यक्तिश्च द्वैतस्यानुभवस्ततः।
ततः सर्गाखिलावस्थापरिणामो विराजते।।३४।।
स्वरूपं च तटस्थं च ज्ञानं द्विविधमीक्षते।
सर्व्वानुभवसिद्धस्य विस्तृतिर्निष्प्रयोजना।।३५।।
अस्तिभावो हि सद्भावो निर्गुणेऽद्वैरूपतः।
सोऽस्ति तस्मात् पृथक्त्वेन सद्भावो नैव विद्यते।।३६।।
सगुणे सगुगत्वेन स्वतः सोऽस्ति ततो निजम्।
जन्मस्थितिलयाध्यक्षं सगुणं ब्रह्म मन्यते।।३७।।

महादेवी और परमपुरुष का जब मिलन होता है, तब ब्रह्मानन्द के अनुसार पाँच भाव प्रकट होते हैं।।३१।। वे पाँच भाव चित्, तेज, शक्ति, विज्ञान् और सत् के नाम से परम प्रसिद्ध हैं। उनमें से चित् के द्वारा मैं चेतन हूँ, इस प्रकार का निश्चय होता है। प्रकृति और प्राकृतिक विश्व, ईश्वर के साथ भगवती का आलिंगन और विराट् रूप में दृश्य का अस्तित्व ये तेज से ही प्रकाश को प्राप्त होते हैं।।३२–३३।। मेरी शक्ति के द्वारा क्रियाभिव्यक्ति, द्वैतका अनुभव और सृष्टि की अखिलावस्था का परिणाम ये सब होते हैं।।३४।।

स्वरूपज्ञान और तटस्थज्ञान इस तरह से दो प्रकार का ज्ञान है। इसका सबको अनुभव है, अतः ज्ञान का विषय विस्तार के साथ समझाने की आवश्यकता नहीं है।।३५।। अस्तिभाव ही सद्भाव है। वह निर्गुण में भी अद्वैत रूप से है। 'वह है' इससे पृथक् सद्भाव और कोई नहीं है।।३६।। सगुण में सगुण रूप से स्वयं वे स्थित हैं। अतः वे अपने को सृष्टि, स्थिति तथा लयका अध्यक्ष सगुण ब्रह्म मानते हैं।।३७।।

एतेषां पंचभावानां विज्ञानात्समजायत।
उपासनानां पंचानां सगुणानां समुद्भवः।।३८।।
सच्चिदानन्दभावानमद्वैते ह्येकरूपता।
एषां त्रयाणां भावानामतोऽत्रानुभवः समम्।।३९।।
तद्विष्णोरिति वाक्योक्तमेतदेव परं पदम्।
कृतार्थतैव सर्वेषामत्रैवेति सुगीयते।।४०।।
सच्चितोः खलु पार्थक्यं यदा द्रष्ट्रानुभूयते।
तदानीं ध्रुवमानन्दो व्यापको विद्यते स्फुटम्।।४१।।
यथाविधि विधेः पूजा न सर्वत्रावलोक्यते।
चित्सत्सत्तानुभूतिर्यत् द्वैते प्राधान्यतो भवेत्।।४२।।
चितोऽनुभूतौ सद्भावोऽप्रधानत्वेन वर्त्तते।
चेतनस्यानुभूतौ यत् तिष्ठत्येव ममास्तिता।।४३।।
निजसत्तानुभूतौ तु चेतनस्यास्तिता स्थिता।
अन्यथानुभवे कोऽनुभविता सम्भविष्यति।।४४।।

इन्हीं पूर्वकथित पाँच भावों के विज्ञानसे पंच सगुणोपासनाओंका प्रादुर्भाव हुआ है।।३८।। सच्चिदानन्द भावों की अद्वैत में एकरुपता रहती है। उस दशा में इन तीनों भावों का अनुभव एक साथ होता है।।३९।। यही 'तद्विष्णोः परं पदम्' इस श्रुतिवाक्यका कहा हुआ परमपद है। यह प्रसिद्ध है कि उसी परम पद में सबकी कृतार्थता होती है।।४०।। द्रष्टा जब सत् और चित् को पृथक् रूप को अनुभव करता है, तभी आनन्द दोनों में व्यापक रूप से अनुभव में आता है।।४१।। ब्रह्मा की पूजा यथाविधि सर्वत्र नहीं देखी जाती। अतः चित्सत्ता और सत्सत्ता का अनुभव द्वैत में प्रधानता से हुआ करता है।।४२।। चित्सत्ता के अनुभव में सत्भाव प्रधानता से हुआ करता है। क्योंकि चेतन की अनुभूति में मेरा अस्तित्व रहता ही है।।४३।। और अपनी सत्ता की अनुभूति में चेतन का अनुभव रहता ही है, नहीं तो अनुभव में अनुभविता कौन होगा?।।४४।।

अतो हरिर्हरप्रेम्णि हरिप्रेम्णि हरस्तथा।
अलौकिकमसादृश्यं तन्मयत्वं सुविन्दते।।४५।।
चित्सतोः सच्चित्तोर्वापि सहैवानुभवेन तु।
आनन्दसत्तानुभवो भवतीति विभाव्यताम्।।४६।।
व्यापकत्वं सुविज्ञेयं चितोऽपि च सतोऽपि च।
अभिव्यक्तेः प्रणाली तु स्वतन्त्रैवावलोक्यते।।४७।।
निदर्शनं विश्वमत्र प्रधानपुरुषात्मकम्।
अत्रैकं प्रकृतेः स्त्रोतः पुरुषस्येतरत्स्फुटम्।।४८।।
सृष्ट्यादौ पुरुषो मूलप्रकृतिश्च ततः परम्।
नरो नारी च सर्व्वत्र स्त्रीपुंभावस्तु विद्यते।।४९।।
द्रष्टात्मा दृश्यदेहो यत्सर्व्वत्र परिलक्ष्यते।
पुंभावः पुरुषे तत्र स्त्रीभावः प्रबलः स्त्रियाम्।।५०।।
पुंभावो जंगमे विप्राः स्त्रीभावः स्थावरे तथा।
किन्तूत्कर्षापकर्षाभ्यां द्वौ भावौ स्तो द्वयोरपि।।५१।।

इसी विज्ञान के अनुसार हर के प्रेम में हरि और हरि के प्रेम में हर की अलौकिक अतुलनीय तन्यमता सुशोभित रहती है।४५।। चित् का सत् के साथ और सत् का चित् के साथ अनुभव होने से आनन्द सत्ता का अनुभव होता है।।४६।। चित् का और सत् का व्यापकत्त्व जानना चाहिये क्योंकि उनकी अभिव्यक्ति की प्रणाली स्वतन्त्र रूप से देखी जाती है।।।४७।। इसका निदर्शक प्रकृति पुरुषात्मक विश्व ही है। इस विश्व में एक प्रकृतिका स्रोत और दूसरा पुरुष का स्रोत विद्यमान है।।४८।। सृष्टि के आदि में पुरुष और मूल प्रकृतिकी स्थिति है। तत्पश्चात् नारी रूप से स्त्रीपुंभाव सर्वत्र विराजमान है।।४९।। अतः द्रष्टा आत्मा और दृश्य देह सर्वत्र देखने में आता है, इसी कारण पुरुष में पुंभाव एवं स्त्रियों में स्त्रीभाव प्रबल होता है।।५०।। हे विप्रगण! ऐसे ही जंगम में पुंभाव और स्थावर में स्त्रीभाव है किन्तु उन दोनों में उत्कर्ष तथा अपकर्ष के अनुसार दोनों भाव विद्यमान रहते हैं।।५१।।

जंगमे खलु पश्वादौ चिदात्मा सद्वपुस्तथा।
नगादौ स्थावरे देवश्चित् तन्मानी स सन्नगः।।५२।।
चिद्भावः पौरुषो भावः सद्भावः प्राकृतः स च।
तयोः सर्वत्र सत्वेन व्यापकत्वं हि चित्सतोः।।५३।।
व्यापिकानन्दसत्तास्ति ततो ब्रह्मा हि केवलम्।
जगतो द्वैतमानन्दं ससर्ज कुशलोत्सुकः।।५४।।
तस्मात्स जगतः स्रष्टा सर्व्वस्य च पितामहः।

योगसाधनमध्ये तु भाव एव विशिष्यते।।६२।।

"अध्यात्मिक उन्नति चाहने वाला मनुष्य पवित्र भाव से यदि पशुयाग (यहाँ शाब्दिक अर्थ नहीं लें।) भी करे, तो वह उसकी मुक्ति का कारण होगा। भक्ति और उपासना के जितने साधन हैं, वे सब केवल भावशुद्धि से ही यथार्थ फल प्रदान करते हैं। जो निष्काम भाव से देवता पितर आदि की उपासना करता है, उसकी उसी से मुक्ति अवश्य ही होती है।" सकाम होकर मनुष्य यदि ब्रह्मोपासना भी करे, तो भावमालिन्य के कारण वह केवल स्वर्ग देने वाली होगी। हे मुनिगण! ज्ञान काण्ड के अन्तर्गत जो शास्त्रशिक्षा की प्रणाली है, उसमें भी यही तत्त्व कहा गया है, सो आप जान लें। विवाद के लिये ही स्थूल दृष्टि से जो शास्त्र पढ़ते हैं, उनका शब्द पांडित्य केवल भारभूत और व्यर्थ है। जो उत्तम वाद के लिये जिज्ञासु बुद्धि से शास्त्रों का अभ्यास करता है, वह अवश्य ही विज्ञान प्राप्त कर आत्माभाव में पहुंच जाता है। "योग साधनों में तो भाव ही प्रधान है।"।।४६–६२।।

योगसिद्धिरलभ्यैव भावालम्बनमन्तरा।
अध्यात्मिक्युन्नतिप्राप्तावुपाया ये प्रकीर्तिताः।।६३।।
तेष्वप्ययं भाव एव मतः प्राधान्यतो बुधाः।
समाधिविषयेऽप्यस्याऽवश्यम्भावो ह्यपेक्षितः।।६४।।
सविकल्पो निर्विकल्पः समाधिर्यो द्विधा मत।
तत्र पूर्वमतिक्रम्य सविकल्पं हि साधकः।।६५।।
निर्विकल्पसमाधौ च प्रविविक्षुर्यदा भवेत्।
तदा सात्त्विकभावस्य साहाय्येनैव तत्र सः।।६६।।
साफल्यं लभते नूनं न तु भावश्रयं बिना।
उक्तंच प्राक् श्रद्धयैव भाव उन्नतिमश्नुते।।६७।।

तयैव चास्य संशुद्धिर्वृद्धयोदेत्यसंशयम्।
यदा च पूर्णरूपेण भावशुद्धिः प्रजायते।।६८।।
तदा नृणां परा भक्तिः स्वत एव सुसिद्ध्यति।
श्रद्धेयं सुतरां प्रत्याहारभूम्युपयोगिनी।।६९।।

भाव का अवलम्बन किये बिना योग सिद्धि अप्राप्य है। हे विज्ञों! अध्यात्मिक उन्नति के जो उपाय कहे गये हैं, उनमें भी भाव की प्रधानता रक्खी गयी है। समाधि के विषय में तो भाव की अधिक आवश्यकता रहती है। समाधि सविकल्प और निर्विकल्प दो प्रकार की कही गयी है। उसमें पहिली सविकल्प समाधि को अतिक्रमण करके जो साधक निर्विकल्प समाधि में प्रवेश करना चाहता है, वह सात्त्विक भाव की सहायता से ही सफलता प्राप्त कर सकता है। भाव का आश्रय लिये विना सफलता नहीं प्राप्त कर सकता। पहिले कहा गया है कि, श्रद्धा से ही भाव की उन्नति होती है, उसी श्रद्धा की वृद्धि से भाव शुद्धि होती है, उसमें सन्देह नहीं है। जब पूर्णरूप से भावशुद्धि हो जाती है, तब मनुष्यों को पराभक्ति स्वयं प्राप्त होती है। यह श्रद्धा प्रत्याहार भूमि में और भाव धारण भूमि में उपकारक है। इसी तरह ध्यान भूमि में भक्ति का अवलम्बन किया जाता है।।६३–७०।।

भावश्च धारणाभूमावुपकारकतांगतः।
एवमेव ध्यानभूमौ भक्तिः समवलम्ब्यते।।७०।।
तस्माच्छ्रद्धैव सर्वेषां मूलमादौ न संशय।
एतदुक्तं मया भावतत्त्वं संजुषते तु यः।।७१।।
सन्तो विशुद्धभावोऽसौ परं श्रेयोऽधिगच्छति।
अता वै योगिनो यस्य भावशुद्धिरजायत।।७२।।
अन्तःकरणमध्येऽथ शास्त्रे श्रद्धा तथा गुरौ।
ईदृशो गुरुभक्तस्य श्रद्धालोस्तत्त्वदर्शिनः।।७३।।
भावशुद्धया पवित्रतान्तः करणस्य च योगिनः।
चिन्मयं रूपमव्यक्तं व्यक्तं मे भवति ध्रुवम्।।७४।।
ईक्षते स तदानीं मां जंगमस्थावरात्मके।
स्थूलसूक्ष्मोभये सर्वे सूत्रे मणिगणं यथा।।७५।।
उपले मूर्त्तिवत् सर्व्वं मय्येवेदं स्थितं जगत्।
विभुराकाशवच्चाऽस्मि तद्द्रष्टा च ततः पृथक्।।७६।।
अस्म्येवाहमिदं सर्व्वे सर्व्वस्मादप्यहं पृथक्।
निमित्तं जगतश्चाऽस्मि तथोपादानमेव च।।७७।।

अतः श्रद्धा ही सबका मूल है, यह निःसन्देह है। हे सत्पुरुषों! वह जो मैंने भावतत्त्व कहा है, इसके आचरण से साधक को भाव शुद्धि होकर वह परम कल्याण को प्राप्त करता है। सारांश यह कि, जिस योगी की भाव शुद्धि हो जाय और जिसके अन्तःकरण में शास्त्र तथा गुरु के प्रति श्रद्धा हो, उस गुरुभक्त, श्रद्धालु, तत्त्वदर्शी योगी को जिसका कि अन्तःकरण भावशुद्धि से पवित्र हो गया है, मेरा अव्यक्त चिन्मय स्वरूप शीघ्र व्यक्त हो जाता है। तब वह इस स्थावर जंगमात्मक और स्थूल सूक्ष्मात्मक उभय प्रकार की सृष्टि में मुझे सूत्र में पिरोये हुए मणियों की तरह देखता है। पत्थर पर खुदी हुई मूर्ति की तरह मुझ में यह सब जगत् स्थित है। मैं विभु और आकाश के समान उनका द्रष्टा होकर उनसे पृथक् हूँ।।७१–७६।। मैं ही यह सब कुछ हूँ और सबसे पृथक् भी हूँ। जगत् का निमित्त कारण मैं हूँ और उसका उपादान कारण भी हूँ।

मत्सत्तया जगत्सत्ता किन्तु व्यक्तस्थितौ जगत्।
मय्येव विन्दते स्वीयां स्थितिमेतद्विनिश्चितम्।।७८।।
अव्यक्तावस्थितौ याति जगत्सत्तालयं मयि।
जीवदेहेऽस्मि कूटस्थोऽनन्तब्रह्माण्डदर्शकः।।७६।।
ईश्वरोऽहं तथा लोके प्रथितः शास्त्रविस्तरे।
ममैकस्मिन् स्थिता क्षुद्रेऽनन्तब्रह्माण्डरूपिणी।।८०।।
सृष्टिरंशेऽहमेवाऽस्मि सच्चिदानन्दरूपवान्।।८१।।
इति श्रीसूर्य्यगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे सूर्य्यर्षिसम्वादे सृष्टिप्रकरणात्मस्वरूप वर्णनं नाम पंचमोध्यायः।

मेरी सत्ता से जगत् की सत्ता है किन्तु जगत् व्यक्तावस्था में मुझमें ही अपने अस्तित्व को प्राप्त करता है और यह निश्चय है कि, अव्यक्त अवस्था में मुझमें जगत् की सत्ता लय को प्राप्त हो जाती है। जीवों के शरीरों में मैं कूटस्थ और अनन्त ब्रह्माण्डों को देखने वाला ईश्वर हूँ–यह बात शास्त्रों में तथा लोक में सर्वत्र प्रसिद्ध है। मेरे एक छोटे से अंश में अनन्त ब्रह्माण्डरूपिणी सृष्टि स्थित है और मैं ही सच्चिदानन्द स्वरूप हूँ।।७७–८१।।

इस प्रकार श्रीसूर्य्यगीतोपनिषद् के ब्रह्मविद्यासम्बन्धी
सूर्य्यर्षिसम्वादात्मक योगशास्त्रका सृष्टिक्रम और आत्मस्वरूप वर्णन नामक
पंचम अध्याय समाप्त।

।।अथ षष्ठोऽध्यायः।।

ऋषय ऊचुः।।१।।

भवतश्चिन्मयं रूपं तत्त्वातीतंच यत् प्रभो!।

इदानिमपि नोऽस्माभिर्बुध्यते खलु तत्त्वतः।।२।।
भगवन! कृपयाऽस्मान् एवं विराड्रूपं प्रदर्शय।
जगद्गुरो! गीयसे त्वं सर्व्वशक्तिसमन्वितः।।३।।

सूर्य्य उवाच।।४।।

भवतां श्रद्धया विप्रा ऐकाग्र्येण च तोषितः।
जिज्ञासया च दिव्यं वश्चक्षुः सम्प्रददेऽधुना।।५।।
यूयं तेनाऽशु मे स्थूलं विराड्रूपं प्रपश्यत।।६।।

ऋषय ऊचुः।।७।।

देवादिदेव! प्रथितप्रभाव! दृष्टवा महाकाश इह प्रसन्ने।
अनाद्यनन्ते सुविराट्शरीरमनाद्यनन्तं तव विस्मिताः स्मः।।८।।
तव प्रसादात् खलु दिव्यदृष्टिसमृद्धिमन्तोऽपि वयं भवामः।
अपूर्व्वदेहस्य तवैकमंगमपीक्षितुं पूर्णमहो क्षमा न।।९।।

महर्षिगण बोले।।१।।

हे प्रभो! आपका तत्त्वातीत चिन्मय रूप हमें अब भी भली भांति नहीं समझ में आता। इसलिये हे भगवान! कृपा करके आप हमें अपना विराट् रूप दिखाइये। हे जगद्गुरो! आप सर्व शक्तिमान हैं।।२–३।।

श्रीसूर्य्यदेव ने कहा।।४।।

हे द्विजगण! आपकी एकाग्रता और श्रद्धा से मैं प्रसन्न हूँ। आपकी जिज्ञासा से मैं अब दिव्यचक्षु प्रदान करता हूँ, जिससे आप मेरे विराट् स्थूल शरीर को देखें।।५–६।।

ऋणिगण बोले।।७।।

हे प्रसिद्ध प्रभाव! देवादिदेव! उस अनादि अनन्त निर्मल महाकाश में आपका अनादि अनन्त विराट् शरीर देखकर हम विस्मित हो गये हैं।।८।। आपके प्रसाद से दिव्य दृष्टि रूप समृद्धि को प्राप्त हुए हैं, तो भी आपके अपूर्व देह के पूरे एक अंगको भी देखने में हम समर्थ नहीं हैं।।९।।

भवच्छरीरप्रतिरोमकूपमहो महासूर्य्यगणः समन्तात्।
अस्माकमेतानि समुज्ज्वलानि स्तभ्नान्ति दिव्यान्यपि दर्शनानि।।१०।।
तवाङ्घ्रिमाश्रित्य यथाधिकारं ब्रह्माण एते हरयो हराश्च।
सृजन्ति रक्षन्ति च संहरन्ति ब्रह्माण्डसंघानिति दृश्यतेऽत्र।।११।।
ऊद्र्ध्वेऽप्यधोऽपीश्वर! नाभितस्ते लोकानसंख्यान् ननु सप्त सप्त।
निरीक्ष्य चित्रं स्मृतिशक्तिहीनाः संस्तम्भिताः केऽपि वयं भवामः।।१२।।
विराट्स्वरूपा दश बाहवस्ते दिशो दश व्याप्य विराजमानाः।
तिष्ठन्ति सम्यक् सुविचित्रमेषां नादिं निरीक्षामह एवमन्तम्।।१३।।

एषां कराणां समनन्तभावात् व्याप्तं महाकाशमपि ह्यनन्तम्।
एतत्पुनश्चिन्यतां मनो नो मोहम्बुधौ साधु निमज्जतीव।।१४।।
आनन्ददस्याऽपि तवाननस्य विचित्रकार्य्यं विवरस्य वीक्ष्य।
अहो वयं विस्मयलुप्तधैर्य्याःस्मः कीदृशास्तन्नहि वक्तुमीशाः।।१५।।

आपके शरीर के प्रत्येक रोम कूप में चारों ओर अनेक महासूर्य विद्यमान हैं, जिनसे हमारी उज्ज्वल और दिव्य दृष्टि भी चकाचौंध को प्राप्त हुई है।।१०।। यहाँ पर देखा जाता है कि, आपके चरण का आश्रय कर अनेक ब्रह्मा, विष्णु, महेश अनेक ब्रह्माण्डों की सृष्टि स्थिति और लय करते हैं।।११।। हे ईश्वर! आपकी नाभि से ऊपर भूः भुवः स्वः आदि असंख्य सप्त ऊर्द्धवलोक और नाभि से नीचे रसातल पातालादि अगणित सप्त अधोलोक देखकर स्मृति शक्ति से हीन हो हम जड़वत् हो गये हैं।।१२।। आपके परमविशाल दश हाथ दशों दिशाओं में व्याप्त हो रहे हैं। उनमें यह विचित्रिता है कि हमें न उनका आदि देख पड़ता है और न अन्त ही दिखाई देता है।।१३।। उन हाथों के अनन्त होने से अनन्त महाकाश भी उनके द्वारा व्याप्त हो रहा है। इसका विचार कर हमारा मन मुग्धतारूप समुद्र में डूब जाता है।।१४।। आनन्द देने वाले आपके मुख के विवरका विचित्र कार्य देखकर हम विस्मित हो ऐसे धैर्यहीन हो गये हैं कि हमें अपनी दशा कुछ कहते नहीं बन आती।।१५।। असंख्य देवता, दिग्पाल, सूर्य, चन्द्र, ब्रह्मा, ग्रह, उपग्रह, तारागणआदि विचित्र रूप से इसमें विराजमान हैं।।१६।।

अतीतसंख्या विबुधा दिगीशाः सूर्य्याः शशांकाः कमलासनाश्च।
अहो ग्रहोपग्रहतारकाद्याः सर्व्वेऽत्र तिष्ठन्ति विचित्रदृश्याः।।१६।।
सिद्धाः सुरा यक्षमहोरगाद्या मर्त्या अमर्त्या भुवनं समन्तात्।
चराचरं हे जगदादिदेव! दृश्यन्त एवाऽत्र विचित्रेमतत्।।१७।।
ब्रह्माण्डसंघानमितानसंख्यान् निर्गच्छतोऽस्मात् खलु काँश्चनाशु।
प्रतिक्षणं कांश्चन गच्छतोऽत्र दृष्टवा वयं विस्मयमाश्रिताः स्मः।।१८।।
एवं विधं किंचन नैव विद्मो यदत्र नो सत् सविकाशमस्ति।
सुसंयमेनाऽपि कथंचनाऽपि न ज्ञातुमीशा वयमस्य तत्त्वम्।।१९।।
इहो महाकालविभोरनन्तरूपं महोग्रोग्रमखण्डनीय्।
कथंचिदेषां परिपश्यतां नो बुद्धिर्हता व्याकुलतां प्रयाति।।२०।।
प्रभो! तव श्रीमुखमण्डनस्य शोभां परानन्दमपंच तेजः।
संपश्यतां नंः परमाऽभिमानः स्वरूपशून्योऽस्तमितः परात्मन्!।।२१।।
तव प्रसादान्नवदिव्यदृष्टिं प्राप्याऽपि विश्वेश्वर! विश्वरूपम्।
अनाद्यनन्तं किमिवाऽद्य वीक्ष्य भीता वयं मूर्च्छितवद्भवामः।।२२।।

हे देवादिदेव! सिद्ध, सुर, यक्ष, महोरग, मनुष्य, देव और समस्त भुवनआदि चराचर इसमें देख पड़ते हैं–यह एक विचित्र बात है।।१७।। जिनकी गिनती नहीं हो सकती ऐसे अनन्त ब्रह्माण्डसमष्टि इसमें से हर एक क्षण में बड़ी शीघ्रता से बाहर निकलते और बाहर से इसमें घुस जाते हैं, वह देख–देख हमें बड़ा विस्मय होता है।।१८।। ऐसी कोई वस्तु नहीं देखते, जो सत् और प्रकाशमय न हो, विशेष ध्यान देने पर भी किसी प्रकार इसका तत्त्व जानने में हम समर्थ नहीं हो सकते।।१९।। अहो, महाकाल प्रभु के अखण्डनीय और उग्रतर से भी उग्र अनन्त रूप को देखकर एकाएक हमारी बुद्धि लोप हो गयी और हम व्याकुल हो रहे हैं।।२०।। हे परमात्मन्! हम लोगों में जो अभिमान था, सो हे प्रभो! आपके सुन्दर मुख की शोभा और परमानन्दमय तेज को देखकर मूल सहित जाता रहा।।२१।। हे विश्वेश्वर! आपके प्रसाद से नवीन दिव्य दृष्टि को प्राप्त करने पर भी आपका अनाद्यनन्त विश्वरूप देखकर हम भयभीत और मूर्च्छित की तरह हो गए हैं।।२२।। हमारी दृष्टि जड़वत् हो गयी है।।

अस्माकमास्ते जड़ितैव दृष्टिः लुप्तैव शान्तिः प्रहतैव बुद्धिः।
कर्त्तव्यमूढ़ा वयमाभवामो गुरुं भवन्तं शरणं प्रपन्नाः।।२३।।
रूपं प्रभो! संहर संहरैतन्मनोहरं दर्शय दर्शयाऽन्यम्।
पूर्णां धृतिं स्याम यथाऽधिगन्तुमीशास्तथा त्वं दयया विधेहि।।२४।।
अनन्तवैचित्र्यमयं प्रदीप्तं विराट्स्वरूपं तव भीतिदं यत्।
तस्माद्वयं चित्तसदेकतत्त्वभावं सुपातुं न तु पारयामः।।२५।।
तत्सच्चिदानन्दमयाऽद्वितीयमतीतवाङ्मानसवर्त्मरूपम्।
दृष्टवा वयं स्याम यथा कृतार्थास्तथा विदध्याभुवनेश्वर! त्वम्।।२६।।
कृपामय! त्वां शरणाप्तवत्सलमचिन्त्यरूपं शरणागता वयम्।
वपुर्मनोवाग्भिरलं समन्ततः सहस्त्रशः संप्रणमाम आकुलाः।।२७।।

व्यास उवाच।।२८।।

एवं प्रार्थयमानेषु महर्षिषु विहाय सः
सूर्य्यो देवो विराड्रूपं रूपं लीलामयं दधौ।।२९।।

शान्ति जाती रही, बुद्धि मारी गयी और हमने कर्तव्यमूढ़ होकर हे गुरो! आपकी शरण ली है।।२३।। हे प्रभो! आप अपने इस रूप को शीघ्र दूर कर मनोहर अन्य रूप शीघ्र प्रकट कीजिये और जिससे हम पूर्ण धैर्य को धारण करने में समर्थ हों, ऐसा उपाय कृपा करके करिये।।२४।। अनन्त विचित्रताओं से युक्त आपका प्रकाशमान भयंकर विराट् स्वरूप देखकर हम अपने चित्त के उत्कृष्ट एकतत्त्वभाव को नहीं रख सकते।।२५।। हे

त्रिभुवननाथ! आप अपना ऐसा सच्चिदानन्दमय, अद्वितीय, वाणी और मन की गति से अतीत स्वरूप प्रकट करिये, जिसे देख कर हम कृतार्थ हों।।२६।। हे करूणामय! शरणागतवत्सल! अचिन्त्यरूप! आपके हम शरणागत हैं और व्याकुल होकर काया, वाणी तथा मनसे हजारों प्रणाम करते हैं।।२७।।

व्यासजी बोले।।२।।

इस प्रकार महर्षियों के प्रार्थना करने पर श्रीसूर्य्यदेव ने विराट् रूप को संवरण करके लीलामयरूप धारण किया।।२६।। उस समय तेजोमय भक्तवत्सल श्रीभगवान् सूर्य्यदेव सहसा गले हुए सोने के समान कान्तिवाले होकर आविर्भूत हुए।।३०।।

तेजोमयस्तदानीं स भगवान् भक्तवत्सलः।
आविर्बभूव सहसा विगलत्कांचनप्रभः।।३०।।
चतुर्षु तस्य हस्तेषु शोभमानेषु सर्व्वथा।
शंखश्चक्रंच कमलं शक्तिश्च रेजिरेतमाम्।।३१।।
सप्तभिर्वाजिभिः सप्तरूपैराकृष्टतमुज्ज्वलम्।
एकचक्रं रथं दिव्यमारूढ़ोऽरुणसारथिम्।।३२।।
प्रसन्नवदनः शान्तः स्मितशोभितदिङ्मुखः।
तेजो ज्योतिश्च सर्व्वेभ्यस्तदानीं प्रददौ भृशम्।।३३।।
एवमाविर्भवन्तं तं भगवन्तं महर्षयः।
विलोक्य बद्धांजलयः प्रणतास्तुष्टुवुर्मुदा।।३४।।

महर्षय ऊचुः।।३४।।

देवादिदेव!स्तोतव्य!ज्योतिर्ज्योतिस्त्वमद्भुतम्।
संजीवयस्यनन्ते हि ब्रह्माण्डे ज्योर्तिषाऽखिलम्।।३६।।
सूर्य्यः स्वतन्त्रः प्रत्येक ब्रह्माण्डे स्वस्वमण्डलात्।
त्वज्ज्योतिराप्तोऽनायासं ज्योतिःस्रोतः किरत्यलम्।।३७।।

उनके शोभायमान चारों हाथों में शंख, चक्र, पद्म और शक्ति अच्छी तरह से सुशोभित थीं।।३१।। सात रंग के सात अश्वों से आकृष्ट उज्ज्वल औदिव्य एक चक्रवाले रथ पर आरूढ़, अरुणसारथि, प्रसंगमुख, शान्त, मन्दहदास्यसे सुशोभित हैं। दशों दिशारूप मुख जिनके, ऐसे सूर्य्यदेव ने उस समय सकल लोकों को तेज और ज्योति प्रदान की।।३२–३३।। इस प्रकार आविर्भूत श्रीभगवान् सूर्य्यदेव के दर्शन करके महर्षि लोग हाथ जोड़कर नम्रतापूर्वक प्रसन्नचित्तसे स्तुति करने लगे।।३४।।

महर्षिगणबोले।।३५।।

हे स्तुति करने योग्य देवादिदेव! आप ज्योतियों के भी ज्योति हैं और उस ज्योति से ही अनन्त ब्रह्माण्डस्थित सकल पदार्थों को आप सजीव करते हैं, यह अद्‌भुतता है।।३६।। आपकी ज्योतिको प्राप्त करके प्रत्येक ब्रह्माण्ड के पृथक्–पृथक् सूर्य्य अपने–अपने मण्डल से अनायास ज्योतिःस्रोत प्रवाहित करते हैं।।३७।।

यत्तेज इह संसारे यच्च ज्योतिस्त्वमेव तत्।
तेजोज्योतिःप्राणतोऽदो विश्वं धत्से त्वमेव हि।।३८।।
अनन्तकोटिब्रह्माण्डपिण्डसंघाः पृथक् पृथक्।
त्वय्येव प्रोथिताः सन्ति सूत्रे मणिगणा इव।।३९।।
आदिर्गुरूणां सर्व्वेषां त्वमेवाऽसि जगदगुरुः।
ऋषिभिः स्रावयस्येतज्ज्ञातस्रोतस्त्वमेव हि।।४०।।
समर्प्य शक्तिर्देवेषु कृत्वा कर्म्मव्यवस्थितिम्।
सृष्टिस्थितिलयानां त्वं सामंजस्यं करोष्यलम्।।४१।।
त्वमेव पितृरूपेण मानवानां क्रमोन्नतिम्।
विदधासि जगद्वन्द्य! कृप्याद्भुतया तया।।४२।।
परमात्मन्! त्वमेतेभ्यो जीवेभ्यो निजतेजसा।
आकृष्य क्रमशो मुक्तिं ददासि सविताऽसि तत्।।४३।।
त्वं विश्ववन्द्य! क्रमशश्चित्सत्ताया विवर्द्धनैः।
जीवन् नयसि कैवल्यं तद्विष्णुरसि विश्वप!।।४४।।

इस संसार में जो तेज और ज्योति है, वह आप ही हैं और इस विश्व को अपने तेज ज्योति और प्राण द्वारा आपने ही धारण कर रखा है।।३८।। अनन्त कोटि ब्रह्माण्ड और पिण्डों के समूह पृथक्–पृथक् होने पर भी सूत्र में मणियों की तरह आप में ही ग्रथित हैं।।३९।। सब गुरुओं के आदि रूप आप ही जगद्‌गुरु हैं और ऋषियों के द्वारा यह ज्ञान का स्रोत आप ही बहाया करते हैं।।४०।। देवताओं को शक्ति प्रदान करके कर्म्मों की व्यवस्था करते हुए सृष्टि स्थिति और लय का ठीक सामंजस्य विधान आप ही करते हैं।।४१।। हे जगत्‌वन्द्य! आप ही अपनी अद्‌भुत कृपा के द्वारा पितृरूप से मनुष्यों की क्रमोन्नतिका विधान करते हैं।।४२।। हे परमात्मन्! आप अपने तेज से आकर्षण करके इन जीवों को क्रमशः मुक्ति प्रदान करते हैं। आप चित्सत्ताका क्रमशः अभिवर्द्धन करते हुए जीवों को कैवल्य की ओर ले जाते हैं। अतः आप विश्व को पालन करने वाले विष्णु हैं।।४४।।

त्वं स्वशक्तिप्रदानेन जीवन् कृत्वोद्‌र्ध्वगामिनः।
क्रमान्नयसि तद्धाम परमं शक्तिरस्यतः।।४५।।
त्वं बुद्धितत्त्वाऽभिव्यक्त्या जीवान् प्रज्ञाप्रदानतः।
नयेर्बुद्धेः परं पारं गणेशोऽसि ततो विभो!।।४६।।
त्वं गुरो! साङ्ख्ययोगस्य कर्म्मयोगस्य च द्वयोः।
समन्वयस्याऽधिकारं दत्त्वा शङ्कर! सर्व्वथा।।४७।।
हृदये साधकस्यालमाविर्भावयसि स्वयम्।
अद्वैतभावं परमं परशान्तिनिकेतनम्।।४८।।
एतामवस्थामासाद्य साधको जगदात्मकः।
स्वतः स्यात्खलु तस्मात्त्वं सदाशिव इति स्मृतः।।४६।।
ब्रह्माण्डानामनन्तानां विधयो हरयो हराः।
त्वच्छक्तिलेशमासाद्य स्वस्वब्रह्माण्डमण्डले।।५०।।
आप्नुवन्तीश्वरत्वं ते कृपादृष्टिं पुनस्तव।
प्राप्याप्तुमर्हन्त्यन्ते तत् त्वत्स्वरूपमनव्ययम्।।५१।।

आप अपनी शक्ति देकर जीवों को ऊर्ध्वगामी करते हुए क्रमशः परमधाम को पहुंचाते हैं। अतः आप शक्तिरूप हैं।।४५।।हे विभो! आप बुद्धितत्त्व की अभिव्यक्ति करके जीवों को प्रज्ञा प्रदान करते हुए बुद्धि के परपार में पहुंचाते हैं। अतः गणेशरूप हैं।।४६।। हे गुरो! हे शंकर! आप साधक को साङ्ख्ययोग और कर्म्मयोग के समन्वय का पूरा अधिकार देकर उसके हृदय में परम शान्ति के निकेतन परम अद्वैत भाव को अच्छी तरह स्वयं अविर्भाव करते हैं।।४७–४८।। इस अवस्था को प्राप्त होकर साधक स्वतः ही जगदात्मक हो जाता है। अतः आप "सदा शिव" इस नाम से अभिहित होते हैं।।४६।। अनन्त ब्रह्माण्डों के ब्रह्मा, विष्णु, महेश आपकी शक्ति के लेश को प्राप्त होकर अपने–अपने ब्रह्माण्डमण्डल में ईश्वरत्व को प्राप्त होते हैं और पुनः वे आपकी ही कृपादृष्टि प्राप्त करके अन्त में आपके उस अव्यय स्वरूप को प्राप्त करने में समर्थ होते हैं।।५०–५१।। आप शब्दातीत होने पर भी कर्ण में श्रवणशक्ति प्रदान करने वाले हैं और आप त्वक् में स्पर्शशक्ति प्रदान करने वाले होने पर भी स्पर्श से बिल्कुल अतीत हैं।।५२।।

शब्दातीतोऽसि कर्णस्य श्रुतिशक्तिप्रदोऽपि हि।
त्वचि स्पर्शप्रदोऽपि त्वं स्पर्शातीतोऽसि सर्व्वथा।।५२।।
दृष्टिशक्तिप्रदोऽप्यक्ष्णोर्दृष्ट्यतीतोऽसि हे गुरो!।
रसातीतोऽसि रसना–रस–शक्तिप्रदोऽप्यलम्।५३।।
घ्राणातीतोऽसि भगवन्! घ्राण घ्राणप्रदोऽपि सन्।

सर्व्वतत्त्वादिरप्यत्र तत्त्वातीतोऽसि विश्वभृत्।।५४।।
प्राणस्य प्राणरूपस्त्वं बुद्धेर्बुद्धिर्मनोमनः।
प्राणबुद्धिमनोभिस्त्वं तथाऽपि न हि गृह्य से।।५५।।
अनाद्यनन्तं विश्वं हि त्यय्येव विद्यतेऽनिशम्।
कदापि च न तत्र त्वमहो तव विचित्रता।।५६।।
दयाप्रदर्शनायैव साधकानां दयामय!।
एतत् सगुण रूपं त्वं दधासि भक्तवत्सलः!।।५७।।
अपारकरूणा देव! तत्वाऽस्मासु ततो वयं।
इदमानन्ददं रूपं दृष्टवा यामः कृतार्थताम्।।५८।।

आप आँखों को दृष्टिशक्ति प्रदान करने वाले होने पर भी हे गुरो! आप दृष्टि से अतीत हैं और आप रसना को रसशक्ति प्रदान करने वाले होने पर भी आप रस से सर्वथा अतीत हैं।।५३।। हे भगवन्! आप घ्राण को घ्राणशक्ति प्रदान करने वाले होने पर भी आप घ्राणातीत हैं और आप सब तत्त्वों के आदि होने पर भी हे विश्व भृत्! आप तत्त्वातीत हैं।।५४।। आप प्राण के भी प्राण, बुद्धि की भी बुद्धि और मन के भी मन हैं तथापि आप प्राण बुद्धि और मन से नहीं ग्रहण किये जाते हैं।।५५।। अनादि अनन्त विश्व निरन्तर ही आप में है परन्तु उसमें आप कदापि नहीं हैं, अहो! आपका यह कैसा वैचित्र्य है।।५६।। हे दयामय! हे भक्तवत्सल! साधकोंपर दया प्रदर्शन करने के अर्थ ही आप इस सगुण रूप को धारण किया करते हैं।।५७।।हे देव! हम लोगों पर आपकी अपार करुणा है, इसी कारण से हम इस आनन्दप्रद रूप को देखकर कृतार्थता को प्राप्त हुए हैं।।५८।।

अपारकरुणातस्ते ह्यपारकरुणामय!।
तवाऽस्मिंश्चरणे भूयो भवामः प्रणता वयम्।।५९।।

व्यास उवाच।।६०।।

इत्युदीर्य प्रणम्यापि भूयो भूयः सहस्रशः।
तूष्णीं ऋषितु जातेषु सूर्यस्तान् सदयोऽब्रवीत्।।६१।।

सूर्य्य उवाच।।६२।।

महिमानं मम ख्यातं जगज्जीवशिवेच्छया।
एतद्विज्ञानमय्यैव प्रचारयत शिक्षया।।६३।।
इड़ापिंगलयोः सन्धौ सायं प्रातश्च भक्तितः।
ध्यायतैतां विराड्मूर्त्तिं यूयं सद्वृत्तबुद्धयः।।६४।।
महेकचित्ता मद्युक्ता मद्भक्ता मत्परायणाः।
मद्याजिनो मत्प्रमाणा मत्स्था भवत सव्वर्था।।६५।।

हे आपार करूणामय! आपकी अपार करूणा से ही आपके इन चरणों में पुनः हम प्रणाम करते हैं।।५६।।

व्यास जी ने कहा।।६०।।

यह कहकर वे ऋषिगण सूर्य्यदेव को पुनः—पुनः हजारों प्रणाम करने लगे और जब ऋषि चुप हुए, तब दयालु सूर्य्यदेव ने उनसे कहा।।६१।।

सूर्य्यदेव कहा।।६२।।

यह मेरी विख्यात महिमा जगत् के जीवों की कल्याण कामना से विज्ञानमयी शिक्षा के द्वारा आप संसार में प्रचार करें।।६३।। इड़ा और पिंगला की संधि में प्रातःकाल और सायंकाल भक्ति भाव से इस विराट् मूर्तिका आप शुद्ध बुद्धिद्वारा ध्यान किया करें।।६४।। केवल मुझमें ही चित्त लगाइये, मेरी ओर सावधानता से तत्पर होइये, मेरे भक्त होइये, मुझमें अनुरक्त होइये, मेरी पूजा करिये, मुझे नमस्कार करिये और मुझमें निरन्तर स्थित होइये।।६५।।

ममाऽव्ययं निर्व्विकारं सच्चिदानन्दरूपकम्।
स्वरूपमेवं सत्येव ज्ञातुं शक्नुत सन्ततम्।।६६।।

महर्षय ऊचुः।।६७।।

प्रभो! तथोपदेष्टव्यं वातवच्चपलं मनः।
यथा निगृह्य शक्ष्यामस्त्वां स्मर्तुं चिरशान्तये।।६८।।
देव! त्वमेव परम उपदेष्टाऽसि वस्तुतः।
तत्त्वतः श्रोतुमिच्छामो भक्तौ योगे च किन्चन।।६६।।

सूर्य्य उवाच।।७०।।

भक्ता महर्षयः सम्यक् श्रूयतामीप्सितं हितम्।
यथार्थविषयासक्तिरनुरागः प्रकीर्तितः।।७१।।
अनुरागो बहुविधो विषयाणां विभेदतः।
पुत्रादिष्वनुरागः सः स्नेह इत्यभिधीयते।।७२।।
स्त्रीमित्रादिषु सः प्रेमा श्रद्धा स जनकादिषु।
मय्येव साधकानां स भक्तिरित्यभिधीयते।।७३।।

तभी मेरे अव्यय, निर्विकार, सनातन और सच्चिदानन्दमय स्वरूपको जानने में निरन्तर समर्थ हो सकेंगे।।६६।।

महर्षिगणने कहा।।६७।।

हे प्रभो! अब ऐसा उपदेश करें, जिससे वायु के समान चंचल मनको रोक कर स्थायी शान्तिके लिये हम आपका स्मरण करने में समर्थ हों।।६८।। हे देव! वास्तव में आप ही परम उपदेष्टा हैं, इस कारण आपसे ही भक्ति और योग के सम्बन्ध में हम कुछ सुनना चाहते हैं।६६।।

श्रीसूर्यदेव बोले।।७०।।

हे भक्त महर्षियो! जो कल्याणकारी विषय आप सुनना चाहते हैं, सो भलीभाँति सुनिये। विषयों में यथार्थ आसक्ति को अनुराग कहते हैं।।७१।। विषयों के भेद से अनुराग कई प्रकार का होता है, पुत्रादि में जो अनुराग होता है, उसे स्नेह कहते हैं।।७२।। स्त्री मित्रादिकों में जो अनुराग होता है, उसको प्रेम और माता पितादि में जो अनुराग होता है, उसको श्रद्धा कहते हैं। साधक जो मुझमें अनुराग करते हैं, उसे भक्ति कहते हैं।।३७।।

अशेषपुण्यसम्भाराऽमृतार्द्रीकृतचेतसाम्।
लभ्येयं विविधा भाति वैधी रागात्मिक च सा।।७४।।
गुरुपदेशपीयूष विधौतपूतमानसा।
मदेकचित्ता भवितुं यतन्ते साधका यदा।।७५।।
यदा स्वानीन्द्रियादीनि मदुपास्तौ तु सर्व्वथा।
नियोजयितुमीहन्ते तदा वैधी प्रकाशते।।७६।।
ततो योगं समभ्यस्य चित्तवृत्तीर्निरुध्य च।
मद्भक्तौ क्रमशो धीर साधके सति मज्जति।।७७।।
मद्भक्तिसागरेऽवर्ण्ये पीयूषरसजेतरि।
उन्मज्जयति तं यैव निमज्जयति च स्फुटम्।।७८।।
सैव रागात्मिका भक्तिरततीतवर्णनागतिः।
विनानुभवमेतस्या रूपं सम्यग् न बुद्ध्यते।।७९।।
पुण्यानां ज्ञानिभक्तानां भक्तिर्ज्ञानमयी तु या।
सैव शुद्धा पराभक्तिः परकल्याणसाधिनी।।८०।।

अनेक पुण्यपुंजरूप अमृत से जिनके चित्त आर्द्र हो गये हैं, उन्हीं को प्राप्त होने वाली यह भक्ति दो प्रकार की होती है। एक वैधी और दूसरी रागात्मिका।।७४।। गुरु के उपदेशरूपी अमृत से धुलकर जिनके मन पवित्र हो गये हों, वे साधक जब मुझमें ही चित्तका लय करने का यत्न करने लगते हैं, और अपनी सब इन्द्रियाँ मेरी ही उपासना में लगा देने की इच्छा करते हैं, तब वैधी भक्ति का उदय होता है।।७५–७६।। फिर योगाभ्यास कर और चित्तवृत्तिका निरोधकर क्रमशः जो धीर साधक मेरी भक्ति में डूबता है।।७७।। अमृत को भी जीतने वाले वर्णनातीत मेरे भक्तिरूपी उस सागर में उसे जो उन्मज्जन तथा निमज्जन कराती है।।७८।। वही रागात्मिका भक्ति है, जो वर्णनातीत है। विना अनुभव के इसका रूप भलीभाँति विदित नहीं हो सकता।।७९।। पुण्यात्मा ज्ञानी भक्तों की जो ज्ञानमयी भक्ति है, वही शुद्ध पराभक्ति परमकल्याणसाधिनी है।।८०।।

निरोधे चित्तवृत्तीनां संयमे च मयिस्थिरे।
विहितो य उपायोऽस्ति स एव योग उच्यते।।८१।।
योगोऽत्र शास्त्रे विज्ञेयः प्राधान्येन चतुर्विधः।
बुभुत्सवो धीरचित्ताः ज्ञातव्यं श्रूयतां स्फुटम्।।८२।।
महर्षयो मन्त्रयोगो हठयोगस्तथा शुभः।
लययोगो राजयोगो ज्ञेया एते प्रयत्नतः।।८३।।
संसारे रागवन्तोऽति ये मत्सन्नयस्तमानसाः।
भावपूर्णो मन्त्रयोगस्तेषां परमभद्रदः।।८४।।
विषयासक्तिशून्यानामपि येषां वपुः स्वतः।
विषयीव ध्रुवं तेषां हठयोगो हितप्रदः।।८५।।
येषां मनः शरीरंच योगोपयोगिनी सदा।
लययोगक्रिया तेषामनुकूला विशेषतः।।८६।।
त्रिषु मन्त्रादियोगेषु तेषु मुख्याधिकारिणाम्।
राजयोगाधिकारे हि घटते मम दर्शनम्।।८७।।

चित्तवृत्तियों के निरोध के लिये और मुझ में उनका स्थिर संयम करने के लिये जो विहित उपाय है, वही योग के नाम से अभिहित होता है,।।८१।। शास्त्रों में योग प्रधान तथा चार प्रकार का होता है। आप धीर प्रकृति और ज्ञानेच्छु हैं। इस कारण आपको जो जानना है, सो स्पष्टतया सुनिये।।८२।। हे महर्षियों! मन्त्रयोग, हठयोग, लययोग और राजयोग ये प्रयत्न पूर्वक जान लेने चाहियें।।८३।। संसार में अनुराग होने पर भी जिन्होंने अपने चित्त मुझमें लगा दिये हों, उन्हें भावपूर्ण मन्त्रयोग परम कल्याणकारी है।।८४।। जो विषयासक्तिशून्य हैं परन्तु जिनका शरीर विषयी के समान हो, उनको हठयोग हितकारी है।।८५।। जिनका शरीर और मन योग के उपयोगी हो, उनके लिये सदा लय योग की क्रिया विशेष अनुकूल होती है।।८६।। उक्त मन्त्रयोग हठयोग और लय योगों में से किसी एक में भी जो मुख्य अधिकारी हों वे ही राजयोग के अधिकारी हैं और इसी अधिकार में उन्हें मेरा दर्शन होता है।।८७।।

मद्दशर्ननिदानत्वात्प्रधानत्वाच्च सर्व्वतः।
योगानां परमत्वाच्च राजयोग इतीर्य्यते।।८८।।
मद्भक्ताः साधकाः सम्यग् राजयोगाधिकारिणः।
मत्स्वरूपं विजानन्तो जीवन्मुक्ता भविन्त ते।।८९।।

इति श्रीसूर्य्यगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे सूर्यर्षिसम्वादे ब्रह्मणोऽधिभूतरूपदर्शन–योग विज्ञानवर्णनं नाम षष्ठोऽध्यायः।

मेरे दर्शन कराने का प्रधान कारण स्वरूप है, सबसे प्रधान है और सब योगों में श्रेष्ठ है, इसी से इसे राजयोग कहते हैं।।८८।। राजयोग के उत्तम अधिकारी मेरे भक्त साधकगण मेरे स्वरूप को जानकर जीवन्मुक्त हो जाते हैं।।८९।।

इस प्रकार श्रीसूर्य्यगीतापनिषद् के ब्रह्मविद्यासम्बन्धि सूर्यर्षिसम्वादात्मक योगशास्त्र का ब्रह्म के अधिभूतरूपदर्शन और योग विज्ञान–वर्णन नामक षष्ठ अध्याय समाप्त।

।।अथ सप्तमोऽध्यायः।।

महर्षय ऊचुः।।१।।

जगद्गुरो! विश्वबन्द्य! हे देव! भुवनेश्वर!।
कर्मिश्रेष्ठस्य तु ब्रूया जीवन्मुक्तत्य लक्षमण्।।२।।
यत्स्वरूपं सुविज्ञाय कृपातस्तव हे गुरो!।
यतितुं प्रभविष्यामो वयमस्मै पिपासवः।।३।।

सूर्य्य उवाच।।४।।

शृणुध्वं संप्रवक्ष्यामि कर्मिश्रेष्ठस्य लक्षणम्।
यच्छ्रुत्वा नैव भूयोऽन्यच्छ्रोतव्यमवशिष्यते।।५।।
भूमिरापेऽनलो वायुः खं मनो बुद्धिरेव च।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा।।६।।
अपरेयमितस्त्वन्यां प्रकृतिं वित्त मे परां।
जीवभूतां हि मुनयः ययेदं धार्यते जगत्।।७।।
कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते।।८।।

महर्षिगण ने कहा।।१।।

हे संसार के वन्दनीय! हे जगद्गुरो! हे चतुर्दशभुवनों के ईश्वर! हे देव! अब कर्मिश्रेष्ठ जीवन्मुक्तों का लक्षण कहिये।।२।। जिसका स्वरूप आपकी कृपा से जानकर हे गुरो! उसके पिपासु हम लोग उसमें यत्नवान् होंगे।।३।।

श्रीसूर्यदेव बोले।।४।।

अब मैं कर्मिश्रेष्ठका लक्षण कहता हूँ, जिसे सुनकर आप लोगों के लिये कुछ भी सुनना अवशेष न रहेगा।।५।। पृथिवी जल, तेज, वायु, आकाश, मन, बुद्धि और अहंकार, मेरी प्रकृति उक्त आठ प्रकार से विभक्त है।।६।। हे मुनिगण! उक्त प्रकृति अपरा (निकृष्टा) है, इसकी अपेक्षा परा (उत्कृष्टा) और एक जीव स्वरूपा (चेतनामयी) मेरी प्रकृति है, उसको जानना चाहिये, जो प्रकृति इस जगत् की रक्षा करती है।।७।। कार्य और कारण इन दोनों के

कर्तृत्व में प्रकृति ही हेतु कही जाती है और पुरुष सुखदुःखादि के भोक्तृत्व में हेतु कहा जाता है।।८।।

पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान्।
कारणं गुणसंगोऽस्य सदसद्योनिजन्मसु।।६।।
उपद्रष्टाऽनुमन्ता च भर्त्ता भोक्ता महेश्वरः।
परमात्मेति चाऽप्युक्तो देहेऽस्मिन् पुरुषः परः।।१०।।
य एवं वेत्ति पुरुषं प्रकृतिंच गुणैः सह।
ज्ञानविज्ञानयुक्तो हि स कर्मिश्रेष्ठ उच्यते।।११।।
अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।
निर्ममो निरहंकारः समदुःखसुखः क्षमी।।१२।।
संतुष्टः सततं योगी यतात्मा द्दढनिश्चयः।
मय्यर्पितमनोबुद्धिः स कर्मिश्रेष्ठ उच्यते।।१३।।
यस्य देहः स्वकीयोऽपि सर्वथा न प्रतीयते।
नेन्द्रियाणि च सर्वाणि स कर्मिश्रेष्ठ उच्यते।।१४।।

सुखदःखादि के भोक्तृत्व में हेतु कहा जाता है।।।८।। पुरुष प्रकृतिस्थ होकर प्राकृतिक सकल गुणों का भोग करता है, सत् और असत् योनि में पुरुष के जन्म का कारण उसका सत्वरजस्तमोगुणों से संग है।।६।। इस प्रकृति के कार्यस्वरूप शरीर में वर्तमान रहकर भी पुरुष प्रकृति के कार्यस्वरूप देह से भिन्न हैं अर्थात् प्रकृति के गुणों से युक्त नहीं हैं, इस कारण वे उपद्रष्टा (साक्षिमात्र), अनुमन्ता (अनुग्राहक), भर्ता (भरणकर्ता), भोक्ता (प्रतिपालक), महेश्वर (ब्रह्मादि के भी अधिपति) और परमात्मा (अन्तर्यामी) भी कहे गये हैं।।१०।। जो इस प्रकार पुरुष का ज्ञान प्राप्त कर लेता है और गुणों के सहित प्रकृति को भी जान लेता है तथा ज्ञान विज्ञान से युक्त है, उसी को कर्मिश्रेष्ठ कहते हैं।।११।। जो सब प्राणिमात्र का अद्वेष्टा, मैत्र और कृपालु हो, जो ममताहीन, निरहंकार, सुखदुःख में समानता जाननेवाला, क्षमाशील, सदा सन्तुष्ट, संयतचित्त, योगी, मुझ में स्थिर लक्ष्य रखने वाला और मेरे में मन और बुद्धि को समर्पण करनेवाला हो, वही कर्मिश्रेष्ठ है।।१२–१३।। जिसे अपने शरीर और इन्द्रियों की सर्वथा प्रतीति नहीं होती, वह कर्मिश्रेष्ठ है।।१४।।

प्रजहाति यदा कामान्सर्वान्विप्रा मनोगतान्।
आत्मन्येवात्मना तुष्टः स कर्मिश्रेष्ठ उच्यते।।१५।।
यस्य प्राणाः प्रशान्तास्युर्मनआदीनि च स्वयम्।
अव्यक्तान्तानि सर्वाणि स कर्मिश्रेष्ठ उच्यते।।१६।।
दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।

वीतरागभयक्रोधः स कर्मिश्रेष्ठ उच्यते।।१७।।
नाऽहंभावश्च यस्याऽस्ति नेदंभावश्च कुत्रचित्।
सर्वद्वन्द्वविहीनात्मा स कर्मिश्रेष्ठ उच्यते।।१८।।
प्राग्बद्धोऽहं विमुक्तोऽद्येत्येवं यस्य स्मृतिर्न च।
नित्यमुक्तस्वरूपः सन् स कर्मिश्रेष्ठ उच्यते।।१९।।
यः सर्वत्राऽनभिस्नेहस्तत्तत्प्राप्य शुभाशुभम्।
नाऽभिनन्दति न द्वेष्टि स कर्मिश्रेष्ठ उच्यते।।२०।।
विदेहमुक्तो यः प्रोक्तो वरिष्ठो ब्रह्मवेदिनाम्।
अरूपो नष्टचित्ताऽसुः स कर्मिश्रेष्ठ उच्यते।।२१।।

"हे मुनिगण! परमानन्द स्वरूप आत्मा में स्वयं संतुप्त होकर जब योगी मानसिक सकल कामनाओं का परित्याग करता है, तब वह कर्मिश्रेष्ठ कहा जाता है।।१५।। जिसके प्राण और मन आदि स्वयं प्रशान्त तथा अव्यक्तभाव में स्थित हों, वह कर्मिश्रेष्ठ है।।१६।। जो दुःख प्राप्त होने पर अनुद्विग्निचित्त और सुख प्राप्त होने पर स्पृहाशून्य हो एवं जो अनुराग भय और क्रोध शून्य हो, वह कर्मिश्रेष्ठ कहा जाता है।।१७।। जिसे न तो अहम्भाव हो और न इदम्भाव हो और जिसका आत्मा सब प्रकार के द्वन्द्वों से रहित हो वह कमिश्रेष्ठ है।।१८।।" मैं पहले बद्ध था, अब मुक्त हो गया, इस तरह का जिसे स्मरण न हो और जो नित्य मुक्तस्वरूप में स्थित हो वह कर्मिश्रेष्ठ है।।१९।। जो सब विषयों में ममतारहित है और उन–उन शुभाशुभों को प्राप्त होकर आनन्द वा विषाद नहीं करता है, उसको कर्मिश्रेष्ठ कहते हैं।।२०।। जो विदेहमुक्त और ब्रह्मवादियों से श्रेष्ठ है तथा जो रूप सम्बन्धरहित और जिसका चित्त एवं प्राण स्वरूपशून्य हो गया हो, वह कर्मिश्रेष्ठ है।।२१।।

यदा संहरते चाऽयं कूर्मोऽंगानीव सर्वशः।
इन्द्रियाणीन्द्रियाऽर्थेभ्यः स कर्मिश्रेष्ठ उच्यते।।२२।।
कर्माणि यस्य सर्वाणि वासनात्रयजानि च।
अभवन्नुपशान्तानि स कर्मिश्रेष्ठ उच्यते।।२३।।
मुनयो यततश्चाऽपि पुरुषस्य विपश्चितः।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः।।२४।।
तानि सर्वाणि संयम्य युक्त आसीत मत्परः।
वशे हि यस्येन्द्रियाणि स कर्मिश्रेष्ठ उच्यते।।२५।।
कर्माणि कर्मभिः शुद्धैरशुद्धान्युपमृद्य यः।
सकर्मब्रह्ममात्रोऽभूत् स कर्मिश्रेष्ठ उच्यते।।२६।।
ज्ञानिनामपि यः श्रेष्ठः सप्तमीं भूमिकां गतः।

उपासकानां यश्चैकः स कर्मिश्रेष्ठ उच्यते।।२७।।
यःसर्वैः पीडितोऽपि स्यान्निर्विकारोऽपि पूजितः।
सुखःदुखे न यस्य स्तः स कर्मिश्रेष्ठ उच्यते।।२८।।

जब साधक इन्द्रियों के सब विषयों से इन्द्रियों को, कछुआ जैसे अपने अंगों को संकुचित करता है, वैसे सर्वदा प्रत्याहार करता है, तब वह कर्मिश्रेष्ठ कहा जाता है।।२२।। तीन प्रकार की वासनाओं से उत्पन्न होनेवाले सब कर्म जिसके शान्त हो गये हों, वह कर्मिश्रेष्ठ है।।२३।। हे मुनियों! प्रमत्त इन्द्रियगण मोक्ष में प्रयत्नशील विवेकी पुरुष के भी मनको बलपूर्वक हरण करते हैं।।२४।। योगी उन इन्द्रियों को संयत करके मत्परायण होकर स्थित रहते हैं। अतः इन्द्रियाँ जिसके वश में हैं, वह कर्मिश्रेष्ठ कहा जाता है।।२५।। "शुद्ध कर्मों से अशुद्ध कर्मों का नाश करके जो केवल कर्मब्रह्म हो गया हो अर्थात् जो जैव कर्मों से रहित होकर केवल और सहज कर्मों में रत हो, वह कर्मिश्रेष्ठ है"।।२६।। सातवीं भूमि में पहुंचने के कारण जो ज्ञानियों में श्रेष्ठ और उपासकों में अद्वितीय हो वही कर्मिश्रेष्ठ है।।२७।। जो सब लोगों द्वारा पीडित अथवा पूजित होने पर भी निर्विकार रहे और जिसके सुख–दुःख छूट गये हों, वह कर्म्मिश्रेष्ठ है।।२८।।

यः सर्व्वैर्मनुजैः पूज्यो यः सर्व्वैश्च सुरासुरैः।
ब्रह्मविष्णुशिवैर्यश्च स कर्म्मिश्रेष्ठ उच्यते।।२१।।
त्यक्त्वा कर्म्माणि सर्व्वाणि स्वात्ममात्रेण तिष्ठतः।
कथं कर्म्मित्वमित्येवं शङ्क्यतां मा महर्षयः।।३०।।
कर्म्मणां फलमेषा हि स्वात्ममात्रेण संस्थितिः।
अतः सफलकर्म्मैष कर्म्मिश्रेष्ठो भवेद्ध्रुवम्।।३१।।
ज्ञानेन ज्ञायते यद्वा उपास्त्या चोपलभ्यते।
तत् स्थिरं प्राप्यतेऽनेन कर्मणाऽतोऽस्य कर्म्मिता।।३२।।
अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः।
सर्व्वारम्भपरित्यागी स कर्मिश्रेष्ठ उच्यते।।३३।।
यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।
शुभाशुभपरित्यागी स कर्म्मिश्रेष्ठ उच्यते।।३४।।

जो सब मनुष्यों का, सब देवताओं का, सब दानवों का तथा ब्रह्मा, विष्णु, महेश्वर का पूजनीय हो, वह कर्म्मिश्रेष्ठ है।।२६।। सब कर्मों को छोड़कर जो केवल आत्माराम हो रहा हो, वह कर्म्मी कैसे हो सकता है? हे महर्षियों! इस प्रकार की शंका मत करो।।३०।। आत्माराम पद प्राप्त करना ही कर्म्मों का फल है। अतः जो सफलकर्म्मा हो, वह निःसन्देह कर्म्मिश्रेष्ठ

है।।३१।। जो निश्चित पद ज्ञान से जाना जाता है अथवा उपासना से प्राप्त होता है, वही कर्म्म से भी मिलता है। इसलिये ऐसे साधक की कर्म्मिता सिद्ध होती है।।३२।। जो सकल विषयों में निस्पृह, शुचि, अनलस, उदासीन (पक्षपातशून्य), चिन्ताशून्य और संकल्प विकल्पशून्य हो, वह कर्म्मिश्रेष्ठ है।।३३।। "जो प्रिय वस्तु पाकर हृष्ट नहीं होता है और अप्रिय वस्तु पाकर द्वेष नहीं करता है, इष्ट वस्तु के नाश में जो शोक नहीं करता है और अप्राप्त वस्तु की आकांक्षा नहीं करता है एवं जो पुण्य पाप का परित्याग करनेवाला है, वह कर्म्मिश्रेष्ठ कहा जाता है"।।३४।। शरीर के रहते हुए देहाध्यास छूट जाने के कारण जो विदेहमुक्त हो जाता है, वह कर्मी कैसे हो सकता है, सो कहता हूँ।।३५।।

देहेऽस्मिन् वर्तमानेऽपि देहस्मृतिविवर्जनात्।
विदेहमुक्त इत्यक्तः कथं कर्म्मीति चोच्यते।।३५।।
देहविस्मृतिमत्त्वेऽपि कर्म्मदेहे स्थितत्वतः।
अन्यदृष्टयाऽस्य देहित्वात् कर्म्मित्वमुपपद्यते।।३६।।
देहस्थत्वादपूर्णः स्यादिति शङ्क्यं न किंचन।
तडागमग्नकुम्भस्थं जलं पूर्णं हि दृश्यते।।३७।।
प्रारब्धकर्म्ममुक्तोऽपि भोगान्मुक्तोऽपि चाऽखिलात्।
धर्मकार्य्ये स्थितः कर्म्मी देहे स्याद्भोगसाधने।।३८।।
साधने सति देहेऽपि साध्यो भोगो न सिद्धध्यति।
देहविस्मृतिमत्वेन देहहीनसमत्वतः।।३९।।
आहिताऽग्नित्वसंसिद्धध्यै ज्योतिष्टोमे कृतेऽपि च।
यथा न स्वर्गमाप्नोति निष्कामः पुरुषर्षभः।।४०।।
जाग्रत्स्वप्नसुषुप्त्यात्मसन्धित्रयकृताऽमृतः।
सर्वसन्ध्यादिरहितः सन्धिभिर्वन्द्यते सदा।।४१।।

देह की विस्मृति होने पर भी कर्म देह में उसकी स्थिति रहने के कारण दूसरी दृष्टि से उसका देहित्व बना ही रहता है और इसीसे उसे कर्मी कहने में कोई हानि नहीं है।।३६।। देही होने के कारण वह अपूर्ण है, ऐसी भी शंका करने पर कोई कारण नहीं है क्योंकि तालाब में डूबे हुए घड़े का पानी पूर्ण ही देख पड़ता है।।३७।। प्रारब्धकर्म तथा सम्पूर्ण भोगों से मुक्त होने पर भी भोग के साधनभूत शरीर में केवल धर्मकार्य करता हुआ ही स्थित रहता है—अतः वह कर्मी है।।३८।। भोग के साधन रूप शरीर के विद्यमान रहने से भी उससे भोग सिद्ध नहीं होते क्योंकि कर्मी को देहकी विस्मृति हो जाने से वह विदेह हो जाता है।।३९।। इसका उदाहरण यह कह सकते हैं कि,

अग्निहोत्र की सिद्धि के लिये निष्काम कर्मयोगी अग्निष्टोम करे, तो भी उसे स्वर्ग में जाना नहीं पड़ता।।४०।। जो जागृत, स्वप्न और सुषुप्ति इन तीनों सन्धियों में एकरुपता प्राप्त करके अमर हो चुका है, वह सब सन्धियों से रहित होकर सन्धियों का ही वन्दनीय हो जाता है।।४१।।

यः सर्वकर्मिभिर्वन्द्यो नित्यं सर्वैरकर्मिभिः।
स कर्मिप्रवरोऽकर्मिप्रवरश्चेति कथ्यते।।४२।।
सर्वसाम्यमुपेतस्य स्वात्मारामस्य योगिनः।
सहस्रशः कृतैः किं वा वन्दनैरकृतैश्च वा।।४३।।
देहादिषु विकारेषु स्वीयत्वं स्वत्वपूर्वकम्।
विहाय नित्यनिष्ठाभिः स्वमात्रः स विराजते।।४४।।
इन्द्रियार्थैर्विमूढ़ानां दुष्कर्मित्वं निगद्यते।
तैरपेतः सुकर्म्मर्येष विदेह इति कथ्यते।।४५।।
यः सर्व्वद्वन्द्वनिर्मुक्तः सर्व्वत्रिपुटिवर्जितः।
सर्व्वाऽवस्थाविहीनः स विदेह इति कथ्यते।।४६।।
समः शत्रौ च मित्रे च तथा मानाऽपमानयोः।
शीतोष्णसुखदुःखेषु समः संगविवर्जितः।।४७।।
तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्।
अनिकेतः स्थिरमतिर्विदेह इति कथ्यते।।४८।।

जो सब कर्मी और अकर्मियों के लिये वन्दनीय हो, वही सच्चा कर्मिश्रेष्ठ और अकर्मिश्रेष्ठ अर्थात् कर्मरहित कहा जा सकता है।।४२।। "जिसके लिये सभी समान हैं, उस आत्माराम योगी को कोई सहस्त्रों प्रणाम करे या न करे दोनों ही उसके लिये समान है"।।४३।। देहादि में और उनके विकारों में जिसने अपने स्वत्व का त्याग कर दिया हो, वह नित्य निष्ठाओं से केवल स्वरूप में ही सदा विराजमान रहता है।।४४।। इन्द्रियों के विषयों से जो मोहित है, उन्हें कुकर्म्मी कहते हैं। उन कर्म्मों को छोड़कर जो सुकर्म्मा बन गया हो, वही विदेह मुक्त है।।४५।। सब प्रकार के द्वन्द्व, समस्त त्रिपुटि और समग्र अवस्थाओं से जो अतीत हो, वही विदेहमुक्त है।।४६।। "जो शत्रु और मित्र में एवं मान और अपमान में एकरूप, शीत, उष्ण, सुख और दुःख में विकार हीन, आसक्ति शून्य, निन्दा और प्रशंसा में समभावापात्र, मौनी, जो कुछ प्राप्त हो उसी से सन्तुष्ट, वासस्थनहीन और स्थिरचित्त व्यक्ति है, वह विदेह मुक्त है—ऐसा कहा जाता है"।।४७—४८।।

लौकिकं वैदिकं कर्म सर्वे यस्मिन् क्षयं गतं।
यस्मान्नैवाणुमात्रंच विदेह इति कथ्यते।।४६।।

यस्येन्द्रियाणि सर्वाणि न चलन्ति कदाचन।
भित्तिस्थचित्रांगानीव विदेह इति कथ्यते।।५०।।
आत्मानं सत्यमद्वैतं केवलं निर्गुणामृतम्।
सम्पश्यतः सदा स्वाऽन्यविकारस्फुरणं कुतः।।५१।
आदिमध्यान्तरहितचिदानन्दस्वरूपिणः।
स्थितप्रज्ञस्य को बाधः शरीरेण स्वयोगिनः।।५२।।
कर्माणि कर्मणा त्यक्त्वा ब्रह्मणा ब्रह्मणि स्थितः।
कर्मणा शर्म सततं सम्प्राप्तस्य विराजते।।५३।।
बुद्धेस्तैक्ष्ण्यंच मौढ्यंच यस्य नैवाऽस्ति किंचन।
बुद्धेः पारंगतस्सोऽयं प्रबुद्धश्शोभतेतराम्।।५४।।
मनस्तथैव संलीनं चितीव लवणं जले।
एवं निरन्तरात्मीयनिष्ठया सोऽद्वयोऽभवत्।।५५।।

लौकिक और वैदिक सभी कर्म्म जिसके क्षय को प्राप्त हो गये हों, अणुमात्र भी शेष न रहे गये हों, वही विदेहमुक्त है।।४६।। "जिसके सब इन्द्रिय कभी चंचल न होते हों और भीतपर लिखे हुए चित्रों की तरह सदा निश्चल रहें, वही विदेह मुक्त है"।।५०।। जो निरन्तर अपने को सत्य, अद्वैत, केवल, निर्गुण और अमृतस्वरूप देखता हो, उसको अपने से भिन्न विकारों का स्फुरण ही नहीं होगा।।५१।। जो आत्मा मे रममाण, आदि मध्य और अन्त से रहित, सच्चिदानन्दस्वरूप एवं स्थितप्रज्ञ हो, उसको शरीर रहने से ही क्या बाधा पहुंच सकती है।।५२।। कर्म से कर्मों को छोड़कर ब्रह्म के द्वारा ब्रह्म में ही जो स्थित हैं, वे कर्म से अखण्ड कल्याण को प्राप्त होकर विराजमान रहते हैं।।५३।। जिसकी बुद्धि में न तीक्ष्णता है और न मूढता ही है, वह बुद्धि के परे रह कर सदा प्रबुद्ध (जागृत) अवस्था में शोभा पाता है।।५४।। जिसका मन चित् सत्ता में उस प्रकार लीन हो, जिस प्रकार जल में नमक लीन हो जाता है, वह निरन्तर आत्मीय निष्ठा से अद्वैतभावमय हो गया है ऐसा जानना चाहिये।।५५।।

समनस्कान् महद्दुःखममनस्कस्य तत्कुतः।
समनस्को हि संकल्पान् कुरुते दुःखकारिणः।।५६।।
प्रारब्धकर्मजं दुःखं जीवनमुक्तस्य कथ्यते।
कर्मत्रयविहीनस्य विदेहस्य कथन्नु तत्।।५७।।
कर्म कर्तव्यमिति वा न कर्तव्यमितीह वा।
यदि मन्येत वैदेहीं न मुक्तिं प्राप्तवांस्तु सः।।५८।।
समाधिर्वाऽथ कर्त्तव्यो न कर्त्तव्य इतीह वा।

यदि मन्येत वैदेहीं न मुक्तिं प्राप्तवांस्तु सः।।५९।।
पूर्वं बद्धोऽधुना मुक्तोऽस्म्यहमित्येव बन्धनात्।
यदि मन्येत वैदेहीं न मुक्तिं प्राप्तवांस्तु सः।।६०।।
पूर्वमप्यभवन् मुक्तो मध्ये भ्रान्तिस्तु बन्धवत्।
यदि मन्येत वैदेहीं न मुक्तिं प्राप्तवांस्तु सः।।६१।।
बन्ध्यापुत्रादिवत्सर्वं मय्यभूदसदित्यपि।
यदि मन्येत वैदेहीं न मुक्तिं प्राप्तवांस्तु सः।।६२।।

मनके अस्तित्व से ही दुःख होता है क्योंकि मन ही दुःखकारी संकल्प करता है। जो मानसरहित है, उसे दुःख छूता तक नहीं।।५६।। जीवन्मुक्त को प्रारब्ध कर्मों से उत्पन्न होने वाले दुःख भोगने पड़ते हैं परन्तु कर्मत्रयविहीन विदेह पुरुष के लिये ऐसा कैसे सम्भव है।।५७।। अमुक कर्म करना है अथवा अमुक नहीं करना इस प्रकार का विधिनिषेध जो मानता हो, उसे विदेह मुक्ति प्राप्त नहीं हुई, ऐसा जानना चाहिये।।५८।। समाधि करना है अथवा नहीं करना है, इसका जो विचार करे, उसे विदेह मुक्ति प्राप्त नहीं हुई, ऐसा जानना चाहिये।।५९। पहिले मैं बद्ध था और अब बन्धन से मुक्त हुआ हूँ ऐसा जो माने, उसे विदेह मुक्ति प्राप्त नहीं हुई है।।६०।। पहिले मैं मुक्त ही था, पर बीच में भ्रम के चक्कर में पड़कर बद्ध की तरह अपने को समझने लगा था, ऐसा जो माने, वह भी विदेह मुक्त नहीं कहा जा सकता।।६१।। बन्ध्यापुत्र की तरह मुझमें सब कुछ असत् हो गया—ऐसा जो माने, उसे विदेह मुक्ति प्राप्त नहीं हुई है।।६२।।

आविद्यकं तमो ध्वस्तं स्वप्रकाशेन वा इति।
यदि मन्येत वैदेहीं न मुक्तिं प्राप्तवांस्तु सः।।६३।।
स्वप्नेऽपि नाऽहंभावोऽस्ति मम देहेन्द्रियादिषु।
यदि मन्येत वैदेहीं न मुक्तिं प्राप्तवांस्तु सः।।६४।।
अरूपनष्टमनसो विदेहत्वं प्रकीर्त्यते।
तत् कथं मन्यमानस्य यत्किचित् स्यादनात्मनः।।६५।।
मनो नश्यति निःशेषं मननस्य विसर्जनात्।
अमनस्कस्वभावं तत्पदं तस्याऽवशिष्यते।।६६।।
यस्य सर्व्वे समारम्भाः कामसंकल्पवर्जिताः।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः।।६७।।
मननेन विनिश्चित्य वैदेहीं मुक्तिमात्मनः।
नैष्कर्म्म्यसिद्धिं वदतां का तृप्तिरविवेकिनाम्।।६८।।
स्वानुभूतिं विना यद्यत्कुर्वन्ति भुवि मानवाः।

तत्तत्सर्वं वृथैव स्यान्मरुभूमौ कृषिर्यथा।।६६।।

स्वप्रकाश से अविद्या के अन्धकार का नाश हो गया है। यह जिसकी भावना हो जाय, वह विदेहमुक्त नहीं है।।६३।। देह और इन्द्रियादि के विषय में मुझे अहंभाव नहीं है, ऐसा जो स्वप्न में भी माने उसे विदेह मुक्ति प्राप्त नहीं हुई है।।६४।। "रूप और मन जिसका नष्ट हो गया हो, वही सच्चा विदेहमुक्त है।" जो केवल चिन्तामात्र से ही ऐसा मानता है कि मैं विदेह मुक्त हूँ, ऐसे अनात्मा को भला विदेह पद कैसे प्राप्त हो सकता है।।६५।। मनन के त्याग से ही मनोनाश होता है और तब विदेहमुक्ति के अधिकारी के लिये अमनस्क स्वभावमात्र ही अवशिष्ट रहता है।।६६।। "जिसके सब कार्य्यारम्भ कामसंकल्प रहित हैं ज्ञानाग्नि से दग्धकर्म्मा उस महापुरुष को विज्ञ लोग पण्डित (विदेहमुक्त) कहते हैं"।।६७।। जो व्यक्ति मनसे ही अपनी विदेह मुक्ति हुई है ऐसा समझकर नैष्कर्म्य सिद्धिकी बातें केवल मुख से कहते हैं, ऐसे अविवेकियों की तृप्ति कैसे हो सकती है।।६८।। स्वानुभव के विना पृथ्वी में मनुष्य जो कुछ करते हैं, वह मरुभूमि में खेती करने के समान व्यर्थ हो जाता है।।६६।।

स्वानुभूत्र्थकं कर्म निकृष्टमपि सर्वथा।
उत्तमं विबुधैः श्लाध्यं नाऽत्र कश्चन संशयः।।७०।।
यस्तु वश्येन्द्रियं शान्तं निष्कामं सद्गुरुं सदा।
स्वात्मैकरसिकं मुक्तयै स धीमानुपगच्छति।।७१।।
काम्यकर्म्माणि चोत्सृज्य निष्कामो यो मुमुक्षया।
शान्त्यादिगुणसंयुक्तं गुरुं प्राप्तः स मुच्यते।।७२।।
ज्ञानाभिमानी कश्चित्तु गुरुभक्तिं विना क्वचित्।
रहस्यमस्या गीतायाः सम्यग् ज्ञातुं न शक्नुयात्।।७३।।
गुरुभक्तिविहीनस्तु साधको नैव कश्चन।
अस्याः पाठेन गीतायाः मत्सान्निध्यं प्रलप्स्यते।।७४।।
मन्त्रपेऽपि शब्देऽस्या गुरुभक्तिं विनानया।
सूर्ययागेऽनुष्ठितेऽपि साधकः सफलो न हि।।७५।।
कर्म्म वोपासना वाऽपि ज्ञानं वा भवति ध्रुवं।
तत्र सर्व्वेषु वर्तेत गुरुभक्तेः प्रधानता।।७६।।

स्वानुभव से युक्त अर्थात् अध्यात्म लक्ष्य युक्त होकर जो कर्म किया जाता है, वह निकृष्ट कर्म भी देवताओं को अत्यन्त प्रिय होता है, इसमें कोई सन्देह नहीं है।।७०।। जिसके इन्द्रिय वश में हों, जो शान्त हो, जो निष्काम हो, जो आत्माराम हो, ऐसे सद्गुरु के पास मुक्ति की इच्छा से जो जाता है, वही बुद्धिमान है।।७१।। काम्य कर्मों को छोड़कर जो निष्काम हो गया है और

जो शान्ति आदि गुणों से युक्त सद्‌गुरु को मुक्ति की इच्छा से प्राप्त हुआ है, वह मुक्त होता है।।७२।। गुरुभक्तिहीन कोई भी साधक इस गीता के पाठ करने से मेरे सान्निध्यको नहीं प्राप्त होगा।।७४।। इस गीता के शब्द मंत्ररूप होने पर भी गुरु भक्ति के विना इसके द्वारा अनुष्ठान किया हुआ सूर्य्ययाग साधक को सफलता नहीं दे सकता।।७५।। कर्म्म उपासना और ज्ञान इन में से कोई भी हो, इन सबमें गुरु भक्ति की प्रधानता है।।७६।।

कल्याणायैव सर्व्वेषां गीतेयं श्राविता मया।
एतां प्रचार्य सर्व्वत्र यूयं कुरुत मंगलम्।।७।।
गुरुश्रद्धाविहीनेभ्यो नास्तिकेभ्यश्च साधकाः।
अविश्वासाऽपवित्रेभ्यो न देयैषा कदाचन।।७८।।
गुरौ शास्त्रे श्रद्दधद्भ्यः विरक्तेभ्यश्च सर्व्वथा।
प्रारब्धवद्भ्यो भक्तेभ्यः प्रदेयेयं प्रयत्नतः।।७६।।
सम्यगध्ययनादस्या स्तापत्रयविमुक्तिः।
कैवल्यमधिगच्छन्ति साधकाः शान्तमानसाः।।८०।।
शृण्वतां पठतां वैतां श्रद्धया प्राणिनां हितां।
आधयो व्याधयः सर्व्वे निवर्त्तन्ते ध्रुवं ध्रवं।।८१।।
पठनात् पाठिनाद् भक्त्या श्रवणादपि सर्व्वथा।
रोगी रोगात्प्रमुक्तः सन् शान्तिमाप्नोति भक्तिमान्।।८२।।
आर्त्तो जिज्ञासुरर्थार्थी त्रय एते सदाशयाः।
पठित्वा पाठयित्वेमां श्रुत्वा स्युः सफलाशयाः।।८३।।

मैंने सबके कल्याण के लिये यह गीता सुनायी है। इसका पूर्णरीत्या प्रचारकर आप मंगल करें।।७७।। जो गुरुभक्ति से हीन, नास्तिक और अविश्वास से अपवित्र हों, उनको यह कभी न दी जाए।।७८।। गुरु और शास्त्रों में जिसकी श्रद्धा हो, जो सर्वथा विरक्त हो और जो भाग्यवान भक्त हो, उसको यह अवश्य देनी चाहिये।।७६।। इसका अच्छी तरह अध्ययन करने से तीनों ताप छूट जाते हैं और फिर वे शान्तचेता साधक कैवल्य को प्राप्त करते हैं।।८०।। श्रद्धा के साथ इस कल्याणकारिणी गीता का पाठ करने से अथवा सुनने ही से प्राणिमात्र की आधि व्याधि छूट जाती है। यह निश्चय है।।८१।। भक्ति भाव से इसका पठन–पाठन या श्रवण ही करने से भक्तिमान् रोगी रोग से मुक्त होकर शान्तिलाभ करता है।।८२।। आर्त्त, जिज्ञासु और अर्थार्थी ये तीनों सदाशय इसका पढ़कर, पढ़ाकर अथवा सुनकर सफलमनोरथ हो सकते हैं।।८३।।

ज्ञानी भक्तों ममैतस्याः श्रवणात्पठनादपि।
पाठनादपि मां द्रष्टुं सदैव भवति प्रभुः।।८४।।
पाठेनाऽस्या मन्त्रतश्च सूर्ययागे ह्यनुष्ठिते।
ज्वरादीनां हि सर्व्वेषां रोगाणां जायते क्षयः।।८५।।
इयं हि गीता रोगाणां मृतसंजीवनी ध्रुवा।
अनाश्या अपि रोगा हि नश्यन्त्यस्याः प्रसादतः।।८६।।
अस्याः प्रसादतो बाह्याः नश्यन्ति व्याधयो यथा।
तथान्तर्व्याधयो नूनं चिराय यान्त्यलं लयम्।।८७।।
चतुर्भिराश्रमैर्वर्णैरस्याः पाठेन सर्व्वथा।
सन्ततं सर्व्वकल्याणं लभ्यते नाऽत्र संशयः।।८८।।
उपासकेभ्यो गीताया अस्या दानेन भक्तितः।
धर्म्मार्थकामा लभ्यन्ते निरायासं प्रदातृभिः।।८९।।
पठनाच्छ्रवणादस्या मननात् पाठनादपि।
मुमुक्षवो निरायासं लभन्ते मोक्षमव्ययम्।।९०।।

मेरी इस गीता को ज्ञानी भक्त भी श्रवण कर, पढ़कर या पढ़ाकर मुझको देखने में समर्थ हो सकते हैं।।८४।। इस गीता के पाठ से और इस गीता के शब्द रूप मन्त्रों से सूर्य्ययाग का अनुष्ठान करने पर ज्वरादि सब रोगों का क्षय हो जाता है।।८५।। यह गीता रोगों के लिये मृतसंजीवनी है, असाध्य रोग भी इस गीता के प्रसाद से नष्ट होते हैं।।८६।। इसके प्रसाद से जैसे वहिर्व्याधियाँ नाश होती हैं, वैसे ही अन्तर्व्याधियाँ भी निर्मूल हो जाती हैं।।८७।। चारों आश्रम और चारों वर्ण इसके पाठ करने से निरन्तर सब कल्याण प्राप्त करते हैं, यह निस्सन्देह है।।८८।। उपासकों को इस गीता के दान करने से दाताओं को निरायास धर्मार्थ और काम प्राप्त होते हैं।।८९।। इस गीता के पठन श्रवण और मनन से और पाठन से भी मुमुक्षु निरायास अव्यय मोक्ष को प्राप्त करते हैं।।९०।।

त्रितापहारिणी सत्यमेषाऽभ्युदयकारिणी।
निःश्रेयसकरी नूनं ब्रवीम्यहमसंशयम्।।९१।।

इति श्रीसूर्य्यगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे सूर्य्यर्षिसंवादे जीवन्मुक्तलक्षण निरूपणं नाम सप्तमोऽध्यायः।

समाप्तेयं सूर्य्यगीता।

यह तीनों तापों को हरण करने वाली, इहलोक में अभ्युदयकारिणी और परलोक में निःश्रेयस पद को देने वाली है, यह जो मैं कहता हूँ, इसमें कुछ भी सन्देह नहीं है।।९१।।

इस प्रकार श्री सूर्य्यगीतोपनिषद् के ब्रह्मविद्यासम्बन्धि सूर्य्यर्षि संवादात्मक योगशास्त्र का जीवन्मुक्त लक्षण निरूपणनामक सप्तम अध्याय समाप्त।

।।श्री सूर्य्यगीता समाप्त।।

।।साभार।।

YAJNAVIDYA : RT & SATYA

Yajna : The Life Giving Reality

यज्ञविद्या : ऋत एवं सत्य



Research & Compilation

RAM SHASTRI

TO BE PUBLISHED.....

वरुणविद्या रहस्यम्
VARUNVIDYA RAHASYAM

VARUN : Emperor of Gods Reigns Over Cosmic Oceans

Divine Water is Varun **Nectar is Water Water is Life**

Research & Compilation
RAM SHASTRI

Compilation : 5
Panch Mahabhoot : 2

PRITHVI VIDYA

Encyclopaedia of Spiritual, Divine and Material Knowledge

।।पृथिवीविद्या।।

Research & Compilation

RAM SHASTRI

Research & Compilation : 6

Panch Mahabhoot : 3

AKASHVIDYA

Science of Abundance

MAHA AKASH

Life Energy Of Cosmos : Essence Of Existence

Research & Compilation

RAM SHASTRI

Panch Mahabhoot : 4

SURYAVIDYA

SUN : SOUL OF EXISTANCE

सूर्यविद्या



Research & Compilation

RAM SHASTRI

Research & Compilation : 8
Panch Mahabhoot : 5, Last

VAYUVIDYA

Encyclopaedia of Life Energy

वायुविद्या

Research & Compilation
RAM SHASTRI

Research Compilation Series : 2

VED AOSHADHI KALPTARU

Vaidic Medicine Encyclopaedia



Sri Vaidyanath Rudra

Research & Compilation

RAM SHASTRI


कैलास महारहस्यम्
राम शास्त्री

KAILAS MAHARAHASYAM

Ram Shastri
Rashtriya Adhyatmik Punarjagran Abhiyan
Parmarth Nyaas

Research & Compilation :

KALPVRIKSHAVIDYA

Kalptaru : The Tree Of Emperor of Varun

Research & Compilation
RAM SHASTRI

Rashtriya Adhyatmik Punarjagran Abhiyan, India
To Be Published

Research & Compilation : 9

RUDRAVIDYA

RUDRA : The Primoradial Sat & Rt, Creator Of The Panch Bhoot & Tri Tattva

रुद्रविद्या

Research & Compilation

RAM SHASTRI

Catalogue of Catalogues of Sanskrit & Spiritual Book Publishers
National Register

प्रकाशकों के सूचीपत्रों का राष्ट्रीय रजिस्टर

ADHYATMIK GRANTHA GANGOTRI

RASHTRIYA ADHYATMIK PUNARJAGRAN ABHIYAN
PARMARTH TRUST
NATIONAL SPIRITUAL REJUVENATION ABHIYAN
SPIRITUAL THINK TANK OF INDIA

71, ARYA NAGAR ALWAR [illegible] NCR RAJASTHAN
CHAIRPERSON : RAM SHASTRI # [illegible]
[illegible]

Updated : 1 Jun, 2018


दिव्य संगीत : आध्यात्मिक धार्मिक महासंगीत रजिस्टर
REGISTER OF SPIRITUAL, RELIGIOUS MUSIC OF INDIA
RASHTRIYA ADHYATMIK PUNARJAGRAN ABHIYAN
PARMARTH TRUST
NATIONAL SPIRITUAL REJUVENATION ABHIYAN
SPIRITUAL THINK TANK OF INDIA
71, ARYA NAGAR ALWAR 301001 NCR RAJASTHAN
CHAIRPERSON : RAM SHASTRI # 09810267700
Updated : 1 Jan, 2018

VISHNUVIDYA

VISHNU : Brahmandavyapini Tej
Bhāg : Vaidic Devta – Prarabdh, Bhagya, Sri, Samagra Aishvarya

विष्णुविद्या

\

Angkor Wat, Cambodia-Champadesh

Research & Compilation

RAM SHASTRI

Rashtriya Adhyatmik Punarjagran Abhiyan, India